Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

आम्नाय—ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

SANGÍTA-PÁRIJÁTA

A RARE ANCIENT TREATISE ON HINDU MUSIC

आम्नाय—ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

BY

AHOBALA

EDITED BY

KÁLÍVARA VEDÁNTABÁGÍŚA

AND

SÁRADÁ PRASÁDA GHOSHA

PUBLISHED BY

BASANTA LÁLA MITRA,

CALCUTTA

THE NEW SANSKRIT PRESS

1879.

[*All Rights Reserved*]

Digitization by Arya Samaj Charitable Foundation, Chennai

आर्य्य-ग्रन्थालय,
भरतनिधि, कर्णघंटा
वाराणसी-१

संगीत-पारिजातः

SANGÍTA PÁRIJÁTA

Digitization by Arya Samaj Charitable Foundation, Chennai

आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

PREFACE

आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

The circumstances, which necessitated the publication of Sangíta-Ratnákara now before the public, led also to the bringing out of this small and rare but valuable treatise on Hindu Music as another relic of the vast literary treasure of the Ancients.

We cannot give the period when Pandit Ahobala, the author of this Sangíta-Párijáta, lived, but it seems more than probable that this book was written long after the Sangíta-Ratnákara, from which it differs very much owing to the peculiar system of music it treats of. This system, unlike that of Ratnákara, admits of greater intervals than a tone or four *śrutis*, and of intervals of less than a semitone or two *śrutis*, and is therefore capable of forming numerous "enharmonic" scales. All notes, except the first and the fifth, are occasionally shifted above or below, and the former is never omitted in the scale. The system in present practice among the musicians of the N. W. Provinces and Lower Bengal appears to be a corruption of, and that of Southern India analogous to, the one treated in this book.

We observe that the definitions of *Madhyama-Gráma* and *Gándhára-Gráma*, which are given here, differ from those given by Śárnga-Deva and other eminent authors, and therefore do not command our confidence.

We beg further to remark that most of the lengths of strings, assigned to the respective notes, are incorrect and contradict the truth conveyed in other passages in the book. Nevertheless, we have not made any corrections, but left them as they are. What we have corrected were

Digitization by Arya Samaj Charitable Foundation, Chennai

the numerous clerical mistakes, that abound in the manuscript. We filled up some omissions. These additions we have enclosed in brackets [ ]. A few lines, which are not filled up, are marked with stars. The definitions of *Kapála*, *Kambala*, *Bâgeyakâra* and *Prabandha* mentioned in the "Contents" are wanting in this manuscript, and will therefore be found wanting in this publication, and will continue to be so to, until we fortunately find another manuscript, or secure a faithful copy of its Persian translation, which, we learn, was sent by Sir William Jones to the Royal Asiatic Society in London, and which, we hope, is still to be found there.

We have given in the book some plates in illustration of the subject.

आम्नाय-ग्रन्थालय,
भरतनिधि, कचौड़ी
वाराणसी-५

विज्ञप्तिः ।

यदुद्दिश्य सङ्गीतरत्नाकरः प्रकाशितस्तदेवास्य सङ्गीतपारिजात-प्रचारस्य प्रयोजनं वेदितव्यम् ।

अयं सङ्गीतपारिजाताख्यो ग्रन्थः सङ्गीतरत्नाकराऽपेक्षया नवीनतर इति प्रतिभाति । परन्त्वयं कदा प्रादुरभूत्तन्न निश्चीयते । एतद्ग्रन्थस्य कर्त्ता अहोबल-पण्डितोऽस्मिन् बह्वनेन विषयान् सङ्गीतरत्नाकराद्विन्यया प्रणाल्या प्रोक्तवानुल्लिखितवांश्च हनूमन्तं बहुशः । अतोऽनुमीयते ग्रन्थोऽसौ हनूमन्मतानुसारीति ।

याश्च रीतिं यञ्च नियममास्थायाधुनिका बङ्गीया ब्रह्मावर्त्तीयाश्च गायकाश्चरन्ति सा रीतिः स च नियमः कियाने तन्मतापभ्रंशकल्प इव लक्ष्यते । दृश्यते तु दाक्षिणात्यानां गीति प्रणाल्यामेतदुक्तप्रणाल्याः सौसादृश्यम् ।

विरलप्रचारत्वेन दौर्लभ्यत्वादस्य ग्रन्थस्य मुद्रालिपिविधौ नैकाधिकमादर्शपुस्तकं लब्धं तदपि भाग्यवशात् पदलोपादिदोषदुष्टम् । सुतरामस्य स्वमस्थानानि यथामति परियोधितानि लुप्तस्थानानि तु सर्व्वाणि पूरयितुमशक्यानि । यानि यानि च लुप्तस्थानान्यस्माभिरूहित्वा प्रपूरितानि तानि तान्येवं [ ] चिह्नेनावेष्टितानि वर्त्तन्ते । यानि च न प्रपूरितानि तेषां स्थानेष्वित्थं * * * चिह्नं निक्षिप्तमिति सुधीभिर्द्रष्टव्यम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

उद्देशश्लोकानामन्ते यानि च कपाल-कम्बल-वाग्गेयकार-लक्षणानि वक्तुं ग्रन्थकृता प्रतिज्ञातानि तान्यप्यस्मादर्शपुस्तकाद् भ्रष्टानीति सुतरां तान्यत्र दातुमसमर्थाः स्मः। सुप्रथितेन सार उइलियम् जोन्स (Sir William Jones) महोदयेन लण्डन नगरस्थे रयाल्-आसियाटीक्-सोसाइटी-गृहे (Royal Asiatic Society in London) यदस्य पारसिकभाषानुवादपुस्तकमेकं प्रेषितमासीत् तच्चेदद्यापि तत्र स्यात् यदि जातु तत्प्राप्स्यामः पुस्तकान्तरं वा तदेभां त्रुटीं परिहरिष्याम इत्याशास्माकमस्ति।

अपरमपि किञ्चिद्वक्तव्यमस्ति। ग्रन्थेऽस्मिन् ग्रन्थकृता मध्यम-ग्राम-गान्धारग्रामयोर्यल्लक्षणमुक्तं सङ्गीतरत्नाकरादिप्रसिद्धग्रन्थ-विरुद्धत्वात्तन्नास्माकं हृद्यम्। स्वरस्थानलक्षणकथनावसरे च ग्रन्थकृता यानि यानि स्वरस्थानानि दर्शितानि तेषां बह्वन्येव भ्रमावहानि स्वोक्त्यन्तरविरुद्धत्वाद्ग्राहकदोषदुष्टानीति स्पष्ट-मुपलभ्यते।

ग्रन्थवैशद्यार्थमेतन्मतानुगतकतिपयचक्रादीनि ग्रामादिबोध-कान्यस्माभिर्निर्म्मायात्र संयोजितानीत्यलमधिकवचनेन।

सम्पादकयोः।

संगीत-पारिजातः।

छन्दोमयं गरुत्मन्तमारूढं सत्यया सह।
स्तूयमानं द्विजौकोभिः पारिजातहरिं भजे ॥ १ ॥
सङ्गीतपारिजातोऽयं सर्व्वकामप्रदोऽर्हणाम्।
अहोबलेन विदुषा क्रियते सर्व्वसिद्धये ॥ २ ॥
सङ्गीतं वेदिकैर्वाक्यैर्बोधितं ब्राह्मणाः सदा।
ऐहिकं तपसा मोक्षं प्राप्नुवन्ति त्वरान्विताः ॥ ३ ॥
अग्निहोत्रं तथा कार्य्यं गानकार्य्यं तथैव हि।
वेदोक्तत्वात् स्मृतिप्रोक्तकर्त्तव्यत्वान्मनीषिभिः ॥ ४ ॥
विष्णुनामानि पुण्यानि सुस्वरैरन्वितानि चेत्।
भवन्ति सामतुल्यानि कीर्त्तितानि मनीषिभिः ॥ ५ ॥
स्वाश्रया मोहिनी माया या तया संवृताश्च ये।
ब्रह्मविष्णुमहेशाः स्युः सङ्गीतोत्सवसृहाः ॥ ६ ॥
ऐहिकामुष्मिके त्यक्त्वा देवर्षिर्नारदः सदा।
ब्रह्मानन्दोऽपि वीणायां वादने नियतोऽभवत् ॥ ७ ॥
दैत्यसंहारिणी दुर्गा सङ्गीतेऽभिरता सदा।
मतङ्गकश्यपावास्तां सङ्गीताभिरुची मुनी ॥ ८ ॥
कर्त्ता सङ्गीतशास्त्रस्य हनूमांश्च महाकपिः।
शार्दूलकोहलावेतौ सङ्गीतग्रन्थकारिणौ ॥९॥

Digitization by Arya Samaj Charitable Foundation Trust, Chennai

कम्बलाश्वतरौ वायुर्धनदश्च राक्षसः ।
रम्भा वाणसुता चोषा फाल्गुनः फणिनां पतिः ॥ १० ॥
इत्येतेऽन्येऽपि सङ्गीतशास्त्रव्याख्यानकारिणः ।
सङ्गीतपारिजाताख्यमत्रं कुर्वेऽनुवृत्य तान् ॥ ११ ॥
दोलायां शायितोबालोरुदन्नास्ते यदा क्वचित् ।
तदा गीताम्बृतं पीत्वा हर्षोत्कर्षं प्रपद्यते ॥ १२ ॥
खगः सोऽपि तृणाहारोविचरन्नटवीं सदा ।
लुब्धकादपि सङ्गीतं श्रुत्वा प्राणान् प्रवञ्चति ॥ १३ ॥
कुष्ठोविषं वमन् सर्पः फणामान्दोलयन् सुखः ।
गानं जाङ्गलीकाकृत्वा हर्षोत्कर्षं प्रपद्यते ॥ १४ ॥
देवस्य मानयोगानं वाद्यं वृत्यमतन्द्रितः ।
कुर्याद्विष्णोः प्रसादार्थमिति शास्त्रे प्रकीर्त्तितम् ॥ १५ ॥
नाहं वसामि वैकुण्ठे योगिनां हृदये न च ।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥ १६ ॥
गायन् सुभद्राग्नि रथाङ्गपाणे-
जन्मानि कर्म्माणि च यानि लोके ।
गीतानि नामानि तदर्थिकानि
गायन् विलज्जोविचरेदसङ्गः ॥ १७ ॥
वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ॥ १८ ॥
वेदे तवैव सम्प्रोक्तं गायतां ब्राह्मणादिति ।
फणदन्तादुभौ वीणादण्डमेवेतिसुस्वरम् ॥ १९ ॥

गीतवाद्यनृत्यानां त्रयं सङ्गीतमुच्यते ।
गानस्यात्र प्रधानत्वात् तत्सङ्गीतमितीरितम् ॥ २० ॥
मार्गदेशीयभेदेन द्वेधा सङ्गीतमुच्यते ।
वेधा मार्गाख्यसङ्गीतं भरतायाब्रवीत् स्वयम् ॥ २१ ॥
ब्रह्मणोऽधीत्य भरतः सङ्गीतं मार्गसंज्ञितत् ।
अप्सरोभिश्च गन्धर्वैः सम्भोरग्रे प्रयुक्तवान् ॥ २२ ॥
ततोऽपि ताण्डवं ज्ञात्वा लास्यं ज्ञात्वोभयोदितम् ।
तत्पुत्रं शिष्यसंघेभ्यः प्रोक्तवान् भरतोमुनिः ॥ २३ ॥
तद्देशीयमिति प्राज्ञः सङ्गीतं देशभेदतः ।
तद्वृद्धं सुस्वरैस्तानैरुपेतं सुखसाधनम् ॥ २४ ॥
विनोद्देशं विना लक्ष्म परीक्षाञ्च विना क्वचित् ।
शास्त्रं न वर्त्तते यस्मात् तस्मात् ताः प्रत्रवीम्यहम् ॥ २५ ॥
पाञ्चभौतिकदेहेऽस्मिन्मूर्द्धनाद्यस्तः परम् ।
तिर्य्यङ्नाद्यश्च स्थानानि चत्वार्युक्तानि तत्र तु ॥२६॥
नादोत्पत्तिः स्वरव्यक्तिस्तासु जातिव्यवस्थितिः ।
स्वरस्थितिर्विप्लुतानां विप्लुतानाञ्च निर्णयः ॥ २७ ॥
स्वरोवादी च सम्वादी चानुवादी विवाद्यपि ।
कुलानि जातयोवर्णा द्वीपानि मुनिदेवते ॥ २८ ॥
छन्दांसि च रसा ह्येते ग्रामास्तु मूर्च्छनास्तः ।
प्रस्तारिताश्च कूटाः स्युः खण्डमेरुस्ततः परम् ॥ २९ ॥
मट्टोद्दिष्टे च तानानां चतुर्णां वर्णलक्षणम् ।
नानाविधा अलङ्कारा जातीनां लक्षणान्यपि ॥ ३० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अंशस्वराः कपालानि कम्बलं गमकास्तथा ।
स्वरस्थानानि सर्व्वे ते मेलाः पञ्चापि गीतयः ॥ ३१ ॥
नामधेयानि रागाणां लक्षणान्यपि सर्व्वशः ।
प्रबन्धलक्षणं चात्र लक्ष्म वाग्गेयकारिणः ॥ ३२ ॥
गायनस्य गुणा दोषा इति काण्डेऽर्थसंग्रहः ॥ ३३ ॥

श्रुतिभेदः ।

ऊर्द्ध्वस्थितनिनाडीषु नाड्यस्तिर्य्यग्गृहृदि स्थिताः ।
द्वाविंशतिमिताश्चेति प्राचीना मुनयोऽब्रुवन् ॥ ३४ ॥
पूर्व्वं नाभिस्थतोऽत्यात् पश्चात्कण्ठः प्रकीर्त्तितः ।
अथ मूर्द्धा तथास्यं स्यादिति स्थानानि मेनिरे ॥ ३५ ॥
हृद्यनाहतचक्रेऽस्मिन्नभिघातनयोगतः ।
आहतस्तत्र नादः स्यादिति शास्त्रे प्रकीर्त्तितम् ॥ ३६ ॥
कण्ठे विशुद्धपद्मं स्यात् सच्चस्वारन्तु मूर्द्धनि ।
मन्द्रमध्यमतारास्था भवेयुस्तेषु तु क्रमात् ॥ ३७ ॥
श्रुतयः स्युः स्वराभिन्नाः श्रावणत्वेन हेतुना ।
अक्षिकुण्डलवत् तत्र भेदोक्तिः शास्त्रसम्मता ॥ ३८ ॥
सर्व्वाश्च श्रुतयस्तत्तद्रागेषु स्वरतां गताः ।
रागाहेतुत्व एतासां श्रुतिसंज्ञैव सम्मता ॥ ३९ ॥
केशाग्रव्यवधानेन वक्तुरोऽपि श्रुतयः स्थिताः ।
वीणायाश्च तथा गात्रे सङ्गीतज्ञानिनां मते ॥ ४० ॥
मध्ये पूर्व्वोत्तरावद्धवीणायां गात्र एव वा ।
षड्जपञ्चमभावेन श्रुतीर्द्वाविंशतिं जगुः ॥ ४१ ॥

द्वाविंशतिश्रुतीनाञ्च व्यवहारप्रसिद्धये ।
तासां नामानि वक्ष्येऽहं नारदीयानुसारतः ॥ ४२ ॥
तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः ।
दयावती तु रौद्र्याख्या रक्तनी रक्तिकेत्यमूः ॥ ४३ ॥
रौद्री क्रोधेति गान्धारे वज्रिकाऽथ प्रसारिणी ।
प्रीतिश्च मार्जनीत्येताः श्रुतयोमध्यमाश्रिताः ॥ ४४ ॥
क्षितीरक्ता च सन्दीपिन्यालापिन्यथ पञ्चमे ।
मदन्ती रोहिणी रम्येत्येताश्चित्रास्तु धैवते ॥ ४५ ॥
उग्रा च क्षोभिणीति हे निषादे वसतः श्रुती ।
इत्युक्ताः सप्त सप्तस्तु प्रोक्ताः स्वरेषु श्रुतयोबुधैः ॥ ४६ ॥
श्रुतीर्विनैकया श्रुत्या यदि षड्जः प्रजायते ।
तदा तयाऽन्ययासिद्धाः श्रुतयस्ता भवन्ति हि ॥ ४७ ॥
एवमेवान्ययासिद्धिः सर्व्वत्र श्रुतिषु स्थिता ।
स्वरात्वेन यदि जायेरन् नैकश्रुत्या कथं भवेत् ॥ ४८ ॥
सत्यं षड्जश्रुतर्धा स्यान्मृदुत्वादिविशेषणैः ।
तत्तज्जातिविशिष्टत्वान्नान्ययासिद्धिरिष्यते ॥ ४९ ॥
अवच्छेदकभेदेन कार्य्यताया एकतः ।
तृणारणिमणिन्यायात् कारणत्वं भवेदिह ॥ ५० ॥
दीप्तेति चायतास्येति करुणेति मृदुस्मिति ।
मध्येति जातयस्तत्तत्स्वरश्रुतिसंख्यया ॥ ५१ ॥
अथ दीप्ता च तीव्रायां कुमुद्वत्यां तथायता ।
मन्दायाश्च मृदुर्ज्ञेया मध्या छन्दोवतीश्रिता ॥ ५२ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

करुणा च दयावत्यां मध्या सा रञ्जनीश्रिता ।
रतिकायां भवेज्जातिर्मृदुसंज्ञा ततः परम् ॥ ५३ ॥
रौद्रायां दीप्ता विज्ञेया क्रोधायासावता स्मृता ।
वज्रिकायान्तु दीप्ता स्यात् प्रसारिण्यां तथावता ॥ ५४ ॥
प्रीत्यां श्रुत्यां मृदुः प्रोक्ता मध्या सा मार्ज्जनीश्रिता ।
क्षित्यासुक्ता मृदुर्ज्जातिर्मध्या रक्तासमाश्रिता ॥ ५५ ॥
सन्दीपिन्यां तथा श्रुत्यामायताजातिरीरिता ।
आलापिन्यां तथा श्रुत्यां करुणाजातिरुच्यते ॥ ५६ ॥
मदन्त्यां करुणा ज्ञेया रोहिण्यामायता स्मृता ।
रम्या मध्याश्रिताजातिरिति सूरिविनिश्चयः ॥ ५७ ॥
उग्रायाञ्च भवेद्दीप्ता मध्या तां क्षोभिणीं श्रिता ।
श्रुतिजातिपरिज्ञानसाधनं कथ्यतेऽधुना ॥ ५८ ॥
स्वरस्थाने क्रियाभेदैर्वैचित्र्यं जायते यतः ।
जातिभेदसमव्याप्यं यत्तज्ज्ञेयं मनीषिभिः ॥ ५९ ॥
वृक्षुचीरगतं यद्वन्माधुर्य्यं नोच्यते बुधैः ।
तद्वत् श्रुतिगता जातीर्व्यक्ता कोवा वदिष्यति ॥ ६० ॥
श्रोत्रप्रत्यक्षसिद्धास्ता भिन्नश्रुतिसमाश्रिताः ।
तद्वच्छ्रुतिगता जातिरन्वर्थनामका भवेत् ॥ ६१ ॥
एवं सप्तस्वरस्थानां श्रुतीनां जातिनिर्णयः ।
श्रुत्यनन्तरसुत्पन्नाः स्निग्धाद्गुरुणनामकाः ॥ ६२ ॥
रञ्जयन्ति स्वतः स्वान्तं श्रोतृणामिति ते स्वराः ।
षड्जर्षभौ च गान्धारस्तथा मध्यमपञ्चमौ ॥ ६३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

शुद्धविकृतस्वर-चक्रम्।

"शुद्धाः सप्त विकाराख्या द्यधिका विंशतिर्मताः।"

श्रुतिनामानि	शुद्धस्वराः	विकृतस्वराः	
		कोमलादयः	तीव्रादयः
तीव्रा	•	•	तीव्र-नि
कुमुद्वती	•	•	तीव्रतर-नि
मन्दा	•	•	तीव्रतम-नि
छन्दोवती	स	•	•
दयावती	•	पूर्व्व-रि	•
रञ्जनी	•	कोमल-रि	•
रतिका	रि	पूर्व्व-ग	•
रौद्री	•	कोमल-ग	तीव्र-रि
क्रोधा	ग	•	तीव्रतर-रि
वज्रिका	•	•	तीव्र-ग
प्रसारिणी	•	•	तीव्रतर-ग
प्रीतिः	•	•	तीव्रतम-ग
मार्ज्जनी	म	•	अतितीव्रतम-ग
क्षितिः	•	•	तीव्र-म
रक्ता	•	•	तीव्रतर-म
सन्दीपिनी	•	•	तीव्रतम-म
आलापिनी	प	•	•
मदन्ती	•	पूर्व्व-ध	•
रोहिणी	•	कोमल-ध	•
रम्या	ध	पूर्व्व-नि	•
उग्रा	•	कोमल-नि	तीव्र-ध
क्षोभिणी	नि	•	तीव्रतर-ध

धैवतश्च निषादोऽयमिति नामभिरीरिताः।
शुद्धत्वविकृतत्वाभ्यां स्वरा द्वेधा प्रकीर्त्तिताः॥ ६४॥
शुद्धाः सप्त विकाराख्या द्यधिका विंशतिर्मताः।
एकोनत्रिंशदुच्यन्ते ते सर्व्वे मिलिताः स्वराः॥ ६५॥
स-री ग-मौ प-धौ नित्य स्वरा इत्यपि संज्ञिताः।
चतुःश्रुतिसमायुक्ताः स्वराः स्युः स-म-पाभिधाः॥ ६६॥
ग-नौ श्रुतिद्वयोपेतौ रि-धौ त्रिश्रुतिकौ मतौ।
स्वरः स्वोत्तरगामी चेत् तीव्रादिवचनोदितः॥ ६७॥
स्वरोऽग्रिमश्रुतिं याति तीव्रसंज्ञां प्रयात्यसौ।
स्वरोऽग्रिमश्रुती याति तदा तीव्रतरोभवेत्॥ ६८॥
स्वरोऽग्रिमश्रुतीर्याति तर्हि तीव्रतमः स्मृतः।
चतस्रः श्रुतयोयस्मिन्नधिकाः सुर्यदा स्वरः॥ ६९॥
तदातीव्रतमाख्याञ्च प्राप्नोतीति बुधा जगुः।
स्वरः पश्चान्निवृत्तश्चेत् कोमलादिभिरीरितः॥ ७०॥
एकश्रुतिपरित्यागात् स्वरः कोमलसंज्ञकः।
श्रुतिद्वयपरित्यागात् पूर्व्वशब्देन मन्यते॥ ७१॥
स्वरः पश्चान्निवृत्तः सन् कोमलादित्वमेति चेत्।
तदुत्तरस्वरे गच्छन् तीव्रतादिकमेति चेत्॥ ७२॥
यस्मात् शुद्धस्वरादेर्यं प्राप्तसंज्ञाः श्रुतीर्जगुः।
साधारण्यं भवेत् तेषामन्यश्रुतिगतत्वतः॥ ७३॥
साधारणोरिखीव्रः स्यादिति सूरिविनिश्चयः।
साधारणान्तरौ गौ स्तस्तीव्रतीव्रतरावितिः॥ ७४॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तद्वा तीव्रतमोगोऽपि ह्यदुर्म इति कीर्त्तितः ।
साधारणान्तरौ मौख्यतीव्रतीव्रतराविति ॥ ७५ ॥
मत्त तीव्रतमोऽप्युक्तोह्यदुःप इति पण्डितैः ।
साधारणोधस्तीव्रः स्यादिति प्रोक्तं मुनीश्वरैः ॥ ७६ ॥
साधारणः काकलीति तथा कैशिक इत्यपि ।
तीव्रतीव्रतरतीव्रतमोऽप्युक्तोमनीषिभिः ॥ ७७ ॥
सकल्पवान्ह्यदुर्निः स इति तीव्रतमोभवेत् ।
एवं शुद्धस्वराणाञ्च विकृतानाञ्च लक्षणम् ॥ ७८ ॥
संगीतशास्त्रवेत्तारः प्रवदन्ति मुनीश्वराः ।
प्रयोगोवक्रधा यस्य वादिनं तं स्वरं जगुः ॥ ७९ ॥
राजत्वमपि तस्येति सुनयः संगिरन्ति हि ।
श्रुतयोऽष्टौ द्वादश वा ययोरन्तरगोचराः ॥ ८० ॥
मिथः सम्वादिनौ तौस्तः सपौ स्यातां पसौ तथा ।
न वादी न च सम्वादी न विवाद्यपि यः स्वरः ॥ ८१ ॥
सोऽनुवादीति विज्ञेयः सूक्ष्मदृष्ट्या विचक्षणैः ।
श्रुतिविच्छेदहेतुत्वं यस्मिन् रागे तु यस्य तु ॥ ८२ ॥
तद्रागस्यस्वरैस्यस्य विवादित्वं भवेद्ध्रुवम् ।
तस्मात्यस्तु सम्वादी वादिनोराजसंज्ञिनः ॥ ८३ ॥
भत्यल्पत्वानुवादी स्याद्विवादी गतुवङ्गवेत् ।
देवताकुलसम्भूताः षड्ज-गान्धार-मध्यमाः ॥ ८४ ॥
पञ्चमः पितृवंशीयो रि-धौ मुनिकुलोद्भवौ ।
निर्दैत्यकुलसञ्जात इत्येषां कुलनिर्णयः ॥ ८५ ॥

स-म-पा ब्राह्मणा ज्ञेयाः क्षत्रियौ च रि-धौ मतौ ।
वैश्यजाती ग-नी ज्ञेयौ शूद्राः स्युर्विकृताः स्वराः ॥ ८६ ॥
इति स्वरगता जातीः प्रवदन्ति मनीषिणः ॥ ८७ ॥
कमलाभः स्वरः षड्ज ऋषभः पिञ्जरः स्वरः ।
हाटकाभस्तु गान्धारः कुन्दाभो मध्यमः स्वरः ॥ ८८ ॥
पञ्चमस्तु स्वरः श्यामो धैवतः पीतवर्णयुक् ।
निषादः कर्बुरश्चेति स्वराणां वर्णनिर्णयः ॥ ८९ ॥
जम्बुगाकुशकौशग्याल्लीश्वेतनामसु ।
द्वीपेषु पुष्करे द्वीपे जाताः सप्तस्वराः क्रमात् ॥ ९० ॥
अग्निर्ब्रह्मा खगाङ्कश्च लक्ष्मीशो नारदो मुनिः ।
तुम्बुरुर्धनदश्चेति ते सप्तस्वरदर्शिनः ॥ ९१ ॥
वह्निब्रह्मसरस्वत्यः शर्वश्रीशगणेश्वराः ।
सप्तस्वांशुरिति प्रोक्ताः क्रमात् षड्जादिदेवताः ॥ ९२ ॥
अथानुष्टुप् च गायत्री त्रिष्टुप् च बृहती तथा ।
पङ्क्तिरुष्णिग्जगत्यौ च छन्दांस्याहुः स्वरेष्विति ॥ ९३ ॥
स-मौ हास्ये च शृङ्गारे स्वरौ स्यातां तथा ध-नी ।
पो वीभत्से तथा दैन्ये भयानकरसे भवेत् ।
रसे शृङ्गारके रिःस्यान्नान्यारोहास्यके पुनः ॥ ९४ ॥
तीव्रो वीरेऽद्भुते रौद्रे हास्ये तीव्रतरः स्वरः ।
तीव्रतरोऽपि शृङ्गारे रसे मध्यम ईरितः ॥ ९५ ॥
तीव्रतमश्च शृङ्गारे ह्यदु-मो हास्यके रसे ।
एवं रसविभागः स्यात् स्वरेषु सप्तसु ध्रुवम् ॥ ९६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ ग्रामाश्रयः प्रोक्ताः स्वरसन्दोहरूपिणः ।
षड्जमध्यमगान्धारसंज्ञाभिस्ते समन्विताः ॥ ९७ ॥
मूर्च्छनाधारभूतास्ते षड्जग्रामस्त्रिपूर्त्तमः ।
रागा ग्रामद्वयाल्लभ्या षड्जग्रामोद्भवा इति ॥ ९८ ॥
यथोक्तश्रुतिकाः प्रोक्ताः षड्जग्रामेऽखिलाः स्वराः ।
मध्यमे मेरुसंस्थेऽस्मिन् मध्यमग्रामसम्भवः ॥ ९९ ॥
यदा तदैव तास्त्रिस्रः श्रुतीर्याति स पञ्चमः ।
निषादं त्रिश्रुतिं तत्र ब्रूयुर्लक्षणकोविदाः ॥ १०० ॥
अन्ये तु श्रुतिभिर्युक्ताः स-ग्रामस्यस्वरा इव ।
श्रुतित्रयत्रयायुक्तोयदा गो सेवगो भवेत् ॥ १०१ ॥
गान्धारग्राम आख्यातस्त्रिभिः श्रुतिभिः परे ।
चतुःश्रुतिर्निषादः स्यात् षड्जोऽपि तिसृभिर्युतः ॥ १०२ ॥

इति ग्रामलक्षणम् ।

आरोहश्चावरोहश्च स्वराणां जायते यदा ।
तां मूर्च्छनां तदा लोके वाञ्छन्ति ग्रामाश्रयं बुधाः ॥ १०३ ॥
सप्तसंख्यायुतास्तासां श्रुतासां नामानि वक्ष्यते क्रमम् ।
तत्तदुत्तरमन्द्रा स्यात् षड्जपूर्व्वकसंज्ञया ॥ १०४ ॥
द्वितीया रजनी प्रोक्ता निषादस्वरपूर्व्वका ।
धैवतादिस्वरोद्भूता तृतीया चोत्तरायता ॥ १०५ ॥
चतुर्थी शुद्धषड्जा स्यात् पञ्चमादिस्वरोद्भवा ।
मत्सर्य्याद्याह्वताख्या सा मध्यमादिस्वरोद्भवा ॥ १०६ ॥
सप्तमस्वरजा तु षष्ठी स्यान्नान्धारस्वरपूर्व्वका ।

श्रुतिस्वरग्राम-चक्रम ।

श्रुति-संख्या	श्रुतिनामानि	श्रुतिजातयः	षड्जग्रामस्वराः	मध्यमग्रामस्वराः	गान्धारग्रामस्वराः
१	तीव्रा	दीप्ता	•	•	नि
२	कुमुद्वती	आयता	•	•	•
३	मन्दा	मृदुः	•	•	•
४	छन्दोवती	मध्या	स	स	स
५	दयावती	करुणा	•	•	•
६	रञ्जनी	मध्या	•	•	•
७	रतिका	मृदुः	रि	रि	रि
८	रौद्री	दीप्ता	•	•	•
९	क्रोधा	आयता	ग	ग	•
१०	वज्रिका	दीप्ता	•	•	ग
११	प्रसारिणी	आयता	•	•	•
१२	प्रीतिः	मृदुः	•	•	•
१३	मार्जनी	मध्या	म	म	म
१४	क्षितिः	मृदुः	•	•	•
१५	रक्ता	मध्या	•	•	•
१६	सन्दीपिनी	आयता	•	प	प
१७	आलापिनी	करुणा	प	•	•
१८	मदन्ती	करुणा	•	•	•
१९	रोहिणी	आयता	•	ध	ध
२०	रम्या	मध्या	ध	•	•
२१	उग्रा	दीप्ता	•	•	•
२२	क्षोभिणी	मध्या	नि	नि	•

Digitization by Arya Samaj Charitable Foundation, Chennai

ऋषभादिस्वरोद्भूता सप्तम्याख्याभिरुक्तता ॥ १०७ ॥
आरोहस्यावरोहस्य तथैव विकृतेष्वपि ।
षाडवौडवरीत्याऽत्र कुर्य्यादारोहणादिकम् ॥ १०८ ॥
मध्यषड्जं समारभ्य तदूर्द्ध्वस्वरमाव्रजेत् ।
पूर्व्वैकैकस्वरं त्यक्त्वा त्वारोहादिकमुच्यताम् ॥ १०९ ॥
शुद्धास्तु यानि नामानि तान्येव विकृतेष्वपि । ११० ॥
पूर्व्वकोमलतीव्राणां ऋषभाणां क्रमेण तु ।
योगे शुद्धस्वरैर्भेदा एकविंशतिरीरिताः ॥ १११ ॥
रिं तीव्रतरमादाय मूर्च्छना क्वापि नोदिता ।
शुद्धगान्धारराहित्याच्छुद्धषट्कवियोगतः ॥ ११२ ॥
कोमलादिकगान्धारैश्चतुर्भिर्विकृतैः स्वरैः ।
अष्टाविंशतिभेदाः स्युः शेषैः शुद्धस्वरैरिह ॥ ११३ ॥
यस्य पूर्व्वस्य संयोगे त्वतितीव्रतनस्य च ।
यस्य योगे रि-मौ शुद्धौ नवभेदान् कथं जगुः ॥ ११४ ॥
तीव्रादि-म-त्वयेनापि भेदास्तत्रैकविंशतिः ।
पूर्व्वकोमलतीव्राणां धैवतानां क्रमेण तु ॥ ११५ ॥
योगे शुद्धस्वरैर्भेदा एकविंशतिरीरिताः ।
धं तीव्रतरमादाय मूर्च्छना क्वापि नोदिता ॥ ११६ ॥
शुद्धनिषादराहित्याच्छुद्धषट्कवियोगतः ।
अष्टाविंशतिभेदाः स्युः कोमलादिकनिस्वरैः ॥ ११७ ॥
निषादं पूर्व्वमादाय मूर्च्छना क्वापि नोदिता ।
शुद्धधैवतराहित्याच्छुद्धषट्कवियोगतः ॥ ११८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

शुद्धैर्विकृतभेदाभ्यां ग-रिभ्यां योजितैःस्वरैः ।
द्वादशभिः शतं भेदा भवन्तीति बुधा जगुः ॥ ११९ ॥
यदा स्यातां रि-धौ तीव्रौ पूर्वकोमलसंज्ञितौ ।
गन्योस्तत्पूर्ववृत्तित्वात् तौ तदादाय नो भिदा ॥ १२० ॥
रिभिःखिभिःसाधा मैश्च विकृतैर्मिलितैः स्वरैः ।
शुद्धैर्भेदास्त्रिषष्टिःस्युः पञ्चभिश्चापि सोऽब्रवीत् ॥ १२१ ॥
त्रिभीरिभिर्विकाराद्यैःसाढ्यैर्षड्स्वरैरपि ।
शेषशुद्धस्वरैर्भेदा जायन्तोऽत्र त्रिषष्टिधा ॥ १२२ ॥
पूर्वकोमलतीव्रैश्च कोमलादिकसंज्ञितैः ।
रिभिःखिभिः स्वरैः शुद्धैरशीतिश्चतुरुत्तरा ॥ १२३ ॥
कोमलादित्वभावैर्गैर्मध्यमैर्विकृतैस्त्रिभिः ।
पञ्चोत्तरशतं भेदान् स्वरैः शुद्धैर्बुधा जगुः ॥ १२४ ॥
कोमलादिकगान्धारैश्चतुर्भिर्विकृतैस्त्रिभिः ।
विकृतैर्धैवतैर्भेदा अशीतिश्चतुरुत्तरा ॥ १२५ ॥
चतुर्भिर्विकृतैर्गैश्च निषादैःसाढ्यैरपि ।
भेदाः शुद्धैः समायोगे स्युः शतं द्वादशोत्तरम् ॥ १२६ ॥
त्रिभिर्मैर्विकृतैर्धैश्च पूर्वादिविकृतैस्त्रिभिः ।
पञ्चशुद्धस्वरैर्भेदान् त्रिषष्टिमिति मेनिरे ॥ १२७ ॥
त्रिधायैश्च निषादैश्च चतुर्भिर्विकृतैः स्वरैः ।
षड्शुद्धस्वरैर्भेदा अशीतिश्चतुरुत्तराः ॥ १२८ ॥
धैवतैर्विकृतैः सर्वैः सर्वैश्च विकृतैर्निभिः ।
शेषैः शुद्धैः कृता भेदाः स्युः शतं द्वादशोत्तरम् ॥ १२९ ॥

रिभिः सर्वैस्तथा गैश्च विकृतैर्मध्यमैःस्वरैः ।
शेषशुद्धैश्च भेदाः स्युः षष्टित्रिंशच्छतत्रयम् ॥ १३० ॥
रिभिः सर्वैस्तथा गैश्च पञ्चभिर्धैवतैस्त्रिभिः ।
शेषैः शुद्धैश्च भेदाः स्युः सप्तत्रिंशच्चतुःशतम् ॥ १३१ ॥
ऋषभैर्विकृतैः सर्वैर्गान्धारैर्वेदसम्मितैः ।
निखरैर्वेदसंख्याकैः शेषैः शुद्धैः स्वरैरपि ।
भेदा भवन्ति साष्टौ च चत्वारिंशच्चतुःशती ॥ १३२ ॥
त्रिभीरिभिस्त्रिभिर्मैश्च त्रिभिर्धैर्विकृतैः स्वरैः ।
वेदशुद्धैश्च भेदाः स्युर्नवाशीत्यधुतं शतम् ॥ १३३ ॥
रिभिस्त्रिभिस्तथा मैश्च निभिरप्यभिसम्मितैः ।
अन्यैः शुद्धैश्च भेदाः स्युर्द्वयं पञ्च पुनर्द्वयम् ॥ १३४ ॥
त्रिभीरिभिर्वेदधैश्च निषादैर्वागसम्मितैः ।
वेदशुद्धैश्च भेदाः स्युर्विंशत्याश्च चतुःशती ॥ १३५ ॥
वागगैर्विकृतैः सर्वैर्मैश्च भैरग्निसम्मितैः ।
अब्धिशुद्धैश्च भेदाः स्युस्त्रिंशती दश पञ्च च ॥ १३६ ॥
विकृतैः पञ्चभिर्गैस्त्रिभिरब्धिनिभिस्तथा ।
अन्यैः शुद्धैश्च भेदाः स्युः सप्तविंशतिचतुःशती ॥ १३७ ॥
अब्धिगैरब्धिधैरब्धि-निभिः शुद्धैः स्वरैरपि ।
भेदा भवन्ति साष्टौ तु चत्वारिंशच्चतुःशती ॥ १३८ ॥
त्रिभिर्मैर्वेदधैश्चापि निषादैरब्धिसम्मितैः ।
अब्धिशुद्धैश्च भेदाः स्युः षष्टित्रिंशच्छतत्रयम् ॥ १३९ ॥
रीणां गानां तथा मानां वक्ष्यमाणाश्च मेलने ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सहस्रं द्विगती षष्टिर्भेदा उक्ता मनीषिभिः ॥ १४० ॥
रीणां गानां तथा मानामश्विनीनाञ्च मेलने ।
शून्यं वसूरसचन्द्र इति भेदाः प्रकीर्त्तिताः ॥ १४१ ॥
रीणां गानामश्विधानां तथा नीनाञ्च मेलने ।
नेत्रं रन्ध्रं मुनिश्चन्द्रो भेदाश्चात्रेति मेनिरे ॥ १४२ ॥
रिभिस्त्रिभिस्तथा मैश्च वेदैर्निस्वरैरपि ।
अष्टोत्तरसहस्रञ्च भेदा उक्ता मनीषिभिः ॥ १४३ ॥
गानां मानां तथा धानां निषादानाञ्च मेलने ।
शून्यं वसूरसचन्द्र इति भेदाः प्रकीर्त्तिताः ॥ १४४ ॥
रीणां गानां तथा मानां धानां नीनाञ्च मेलने ।
षट्सहस्रञ्च विंशत्या शतं सप्त च संयुताः ॥ १४५ ॥
इति भेदान् मुनीन्द्रास्तु प्राहुः शास्त्रेण बोधितान् ।
मूर्च्छनानां प्रभेदानां सम्पूर्णानि च सर्व्वशः ॥ १४६ ॥
वसुरन्ध्री रसाष्टौ च चन्द्रश्चेति मितिर्भवेत् ।
भवन्ति मूर्च्छना एता ग्रामेऽस्मिन् षड्जसंज्ञके ॥ १४७ ॥
ग्रामयोर्ग-मयोरेवं सम्पूर्णा मूर्च्छना मताः ।
मध्यमे मध्यमस्यापि गान्धारे ग-स्वरस्य च ॥ १४८ ॥
विकृतत्वं न वक्तव्यं तयोर्यस्मात् प्रधानता ।
ग-म-ग्रामे ग-सौ त्यक्ता मूर्च्छना नाभिसम्मता ॥ १४९ ॥
आद्याद्यमूर्च्छनाताने सम्पूर्णे कथिते बुधैः ।
तानाः पञ्चसहस्राणि चत्वारिंशदूनितानि च ॥ १५० ॥
तावत् संख्याविशिष्टानां तानानां गणना कृता ।

स्वरसेपुरसा नेत्रमश्विर्वक्रैः श्रुतीति च ॥ १५१ ॥
नि-ध-प-म-ग-रीणान्तु लोपादथ च षाड़वाः ।
क्रमादेकैकसंत्यागात् षट्त्रिंशन्मूर्च्छना मताः ॥ १५२ ॥
एतं षाड़वमुद्गाः स्युर्विकृता अपि चक्ष्महे ।
त्रयोदश रिभेदाः स्युर्भेदास्तत् सप्तमा मताः ॥ १५३ ॥
इति भेदा निहीनानामष्टसप्ततिरीरिताः ।
एवं भेदा ध-हीनानामशीतिश्चतुरुत्तराः ॥ १५४ ॥
तथा भेदाः प-हीनानां स्युः शतं लोचनोत्तरम् ।
म-हीनानान्तु भेदाः स्युरशीतिश्चतुरुत्तराः १५५ ॥
तथा गान्धारहीनानामष्टसप्ततिरीरिताः ।
रि-हीनानामपि ज्ञेया अशीतिश्चतुरुत्तराः ॥ १५६ ॥
चतुर्भिश्च रिभिस्तत्र गान्धारैः पञ्चभिः स्वरैः ।
षड्जवर्तिनि-हीनाः स्युर्भेदा उक्ता मनीषिभिः ॥ १५७ ॥
रिभिस्त्रिभिस्तथा मैश्च भेदाः स्युरश्विराशुगाः ।
एवं रिभिस्तथा मैश्च भेदास्तावन्त एव हि ॥ १५८ ॥
पञ्चभिर्गैस्त्रिभिर्मैश्च भेदा नवतिरीरिताः ।
गान्धारधैवतानान्तु द्विसप्ततिभिदा मताः ॥ १५९ ॥
मध्यमानां तथा धानां भेदाः स्युरश्विराशुगाः ।
इति भेदा नि-हीनानां सविंशतिचतुःशती ॥ १६० ॥
एवं भेदा ध-हीनानामशीत्या स्युश्चतुःशती ।
भेदा ज्ञेयाः प-हीनानां रसोवाणोमुनिः क्रमात् ॥ १६१ ॥
म-हीनानामपि ज्ञेयाः षड़शीत्या चतुःशती ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तथा गान्धारहीनानां लोचनेन चतुःशती ॥ १६२ ॥
ऋषभेणापि हीनानामशीत्याप्युच्यते चतुःशती ।
रिभि-गैं-मैं: खभेदैश्च ज्ञेया भेदा विचक्षणैः ॥ १६३ ॥
मूर्च्छनासु नि-हीनासु षष्ट्या युक्तं शतत्रयम् ।
रि-ग-धैश्च भिदा ज्ञेया साष्टाशीतिशतद्वयम् ॥ १६४ ॥
रि-म-धैश्चापि भेदाः स्युर्द्विषष्ट्या च युतं शतम् ।
ग-म-धैश्च भिदा ज्ञेया सप्तत्या च शतद्वयम् ॥ १६५ ॥
इति भेदा नि-हीनानामशीत्या च सहस्रकम् ।
तथा भेदा ध-हीनानां खलोचनाग्नयः शशी ॥ १६६ ॥
एवं भेदाः प-हीनानां सहस्रत्रयसंख्यकाः ।
म-हीनानामपि ज्ञेया वेदौ वह्निः शशी क्रमात् ॥ १६७ ॥
तथा भेदा ग-हीनानामब्धिः शरोऽथ रन्ध्रकम् ।
इतिभेदा रि-हीनानां नेत्रकाग्न्यग्नयः शशी ॥ १६८ ॥
रि-ग-मानां तथा धानां नि-हीनासु विभेदतः ।
इति योगे भिदा ज्ञेया शून्यं वसुर्नभः शशी ॥ १६९ ॥
[रि-ग-मानां तथा नीनां ध-हीनासु विभेदतः ।
इति योगे भिदा ज्ञेया शून्यं वेदौ च चन्द्रमा ॥ १७० ॥]
रि गाणाञ्च म-धानाञ्च मूर्च्छनासु विभेदतः ।
योगे भेदाः प-हीनासु शुरशीत्या सहस्रकम् ॥ १७१ ॥
रि-गाणाञ्च म-नीनाञ्च प-हीनासु विभेदतः ।
मूर्च्छनासु भिदा योगे खञ्च वेदौ शशी पुनः ॥ १७२ ॥
रि-ग-धानां तथा नीनां प-हीनासु विभेदतः ।

योगे तत्र भिदा ज्ञेया रसोवह्निः शरः शशी ॥ १७३ ॥
रि-म-धानां तथा नीनां प-हीनासु विभेदतः ।
योगे भेदास्तथा ज्ञेयाः सागरश्च रसो वसुः ॥ १७४ ॥
ग-म-धानां तथा नीनां प-हीनासु विभेदतः ।
योगे तत्र भिदा ज्ञेयाः शून्यं वेदौ शशी पुनः ॥ १७५ ॥
इति भेदाः प-हीनानां शूरसौ पावको रसः ॥ १७६ ॥
रि-ग-नाञ्च ध-नीनाञ्च म-हीनासु विभेदतः ।
इति योगे भिदा ज्ञेयाः रसो वह्निः शरः शशी ॥ १७७ ॥
रि-म-धानां तथा नीनां ग-हीनासु विभेदतः ।
[इति योगे भिदा ज्ञेयाः सागरश्च रसो वसुः ॥ १७८ ॥
ग-म-धानां तथा नीनां रि-हीनासु विभेदतः ।]
इति योगे भिदा ज्ञेयाः खञ्च वेदौ शशी पुनः ॥ १७९ ॥
रि-ग-म-ध-निषादानां योगे भेदा उदीरिताः ।
खरससुनिषाणैश्च प-हीनासु मुनीश्वरैः ॥ १८० ॥
मूर्च्छनानां प्रभेदानां षाड़वानाञ्च सर्व्वशः ।
खवागभून्यवन्द्वैश्च पावकेन मितिर्भवेत् ॥ १८१ ॥
यत्स्वरेण विहीना वा मूर्च्छना वा द्वयक् पृथक् ।
तत्स्वरेणैव हीनाः स्युः प्रस्तारा: षाड़वाः क्रमात् ॥ १८२ ॥
सप्तघ्न्या सविंशत्या गुणितानां मितिर्भवेत् ।
शून्यत्रयं रसो नेत्रं सप्त वह्निरिति क्रमात् ॥ १८३ ॥
षाड़वा अथ कथ्यन्ते शुद्धेषु विकृतेष्वपि ॥ १८४ ॥
द्वयोर्द्वयोः परित्यागात् क्रमाद्भेदा मनीषिणः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

औड़वानां विशुद्धानामवदन् पञ्चसप्ततिम् ॥ १८५ ॥
रि-भेदात्तत संगत्य द्वाभ्यां द्वाभ्यां विवर्ज्जनात् ।
भेदानपि विजानीयात् पञ्चाग्रद्युत्तरं शतम् ॥ १८६ ॥
ग-भेदा द्विगती ज्ञेया ग-भेदा रि-समा मताः ।
ध-भेदात्तत्समा ज्ञेया नि-भेदा ग-समा मताः ॥ १८७ ॥
रीणां गानां प्रभेदाः स्युरशीत्या च चतुःशती ।
रीणां मानाञ्च भेदाः स्युः सप्तत्या च शतद्वयम् ॥ १८८ ॥
रीणां धानां तथा भेदाश्चायन्तोऽत्रापि सम्मताः ।
रीणां नीनां प्रभेदाः स्युः षष्ट्या युक्तं शतत्रयम् ॥ १८९ ॥
ग-मानाञ्च भिदा ज्ञेया षण्णवत्याग्रशतुःशती ।
तथा भेदा ग-धानाञ्च षष्ट्या युक्तं शतत्रयम् ॥ १९० ॥
ग-नीनाञ्च भिदा ज्ञेया अशीत्या च चतुःशती ।
म-धानाञ्च प्रभेदाः स्युः सप्तत्या च शतद्वयम् ॥ १९१ ॥
म-नीनाञ्च भिदा ज्ञेया षष्ट्या युक्तं शतत्रयम् ।
ध-नीनाञ्च प्रभेदाः स्युरशीत्या च चतुःशती ॥ १९२ ॥
रि-ग-मानां भिदात्तत शून्यद्वन्द्वञ्च रन्ध्रकम् ।
रि-ग-धानां प्रभेदाः स्युः शून्यं नेत्रं मुनिस्तथा ॥ १९३ ॥
रि-ग-नीनां भिदा ज्ञेया खरसाश्वय रन्ध्रकम् ।
रि-म-धानां तथा भेदा पञ्चोत्तरचतुःशती ॥ १९४ ॥
रि-स-नीनां प्रभेदाः स्युः खञ्च वेदः शरस्तथा ।
रि-ध-नीनां भिदा ज्ञेया शून्यं नेत्रं तथा मुनिः ॥ १९५ ॥
ग-म-धानां तथा भेदाः शरो मुनिस्तथा रसः ।

ग-म-नीनां प्रभेदाः स्युः शून्यद्वन्द्वञ्च रन्ध्रकम् ॥ १९६ ॥
ग-ध-नीनां भिदा ज्ञेया खरसाङ्कैर्विचक्षणैः ।
म-ध-नीनां तथा भेदाः शून्यं नेत्रं तथा मुनिः ॥ १९७ ॥
रि-गानाञ्च म-धानाञ्च भेदा नवशतानि च ।
रि-ग-मानां भिदा नीनां खद्वयं लोचनं शशी ॥ १९८ ॥
रि-ग-धानाञ्च नीनां स्युः खं वसुर्लोचनं शशी ।
रि-म-धानां भिदा नीनां शून्यं नेत्रं तथा मुनिः ॥१९९॥
ग-मानाञ्च ध-नीनां स्युः खद्वयं लोचनं शशी ॥ २०० ॥
औड़वानाञ्च सर्व्वेषां मूर्च्छनानां मितिर्भवेत् ।
षष्टिश्च सप्तसाणि पञ्च पञ्चशतानि च ॥ २०१ ॥
द्वाभ्यां द्वाभ्यां विहीनायां मूर्च्छनायां पृथक् पृथक् ।
ताभ्यामेव विहीनाः स्युः प्रस्तारा औड़वा क्रमात् ॥२०२॥
षविंशत्या शतेनात्र गुणितानां मितिर्भवेत् ।
शून्यं नेत्रं शशी शून्यं नेत्रोद्धीति संख्यया ॥ २०३ ॥

इति मूर्च्छनाप्रकरणम् ।

प्रथमस्य द्वितीयस्यादृत्तिरेका स्वरस्य च ।
तृतीयस्य द्विरावृत्तिः स्वरस्यात्र सुनिश्चितः ॥ २०४ ॥
चतुर्थस्य षडावृत्तिः पञ्चमस्याश्चतुर्गुणः ।
तस्मात् पञ्चगुणः षष्ठः सप्तमः षड्गुणस्ततः ॥ २०५ ॥
चलितानां स्वराणान्तु यथोचितक्रमो भवेत् ।
इति पञ्चशतसाणि चत्वारिंशदृयुतानि च ॥ २०६ ॥
पूर्णानां षाड़वानान्तु सप्तशतानि विंशतिः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

औडवानान्तु विंशत्या शतं भेदान् बुधा जगुः ॥ २०७ ॥
चतुर्विंशतिभेदाः स्युश्चतुर्णां तत्र निश्चिताः ।
षड्भेदाः स्युस्त्रयाणान्तु हयोर्द्वावेव निश्चितौ ॥ २०८ ॥
एकस्यैको भवेद्भेदः प्रस्तारा दृष्टया मताः ।
नष्टोद्दिष्टप्रबोधार्थं खण्डमेरवोच्यते ॥ २०९ ॥
सप्ताद्येकान्त्यकोष्ठः स्याद् वामे हीनाप्तितो भवेत् ।
आद्यपंक्त्याद्यकोष्ठेषु लिखेदेकं परेषु खम् ॥ २१० ॥
आद्यकोष्ठे द्वितीयस्थे पङ्क्तावेकं लिखेदपि ।
पङ्क्तिपूर्त्तौ तिर्य्यक्तु कोष्ठस्याङ्कगुणं न्यसेत् ॥ २११ ॥
शून्येषु लोष्टकान् दत्त्वा मूलकर्म ततो लिखेत् ।
उद्दिष्टं तदधः कृत्वा ततो लोष्टस्य चालनम् ॥ २१२ ॥
उद्दिष्टान्तस्वरो मूलकर्मस्थान्त्यात्क्रियन्तम् ।
तावत् संख्याविशिष्टे च कोष्ठे लोष्टकमाक्षिपेत् ॥ २१३ ॥
लोष्टचालनमन्त्यात् स्थाद्यस्थं त्यक्त्वा क्रमो भवेत् ।
अन्तयोरुभयोरेको लोष्टस्य चलनं न हि ॥ २१४ ॥
मूलैकाङ्कं गृहीत्वैव लोष्टाक्रान्ताङ्कमेलने ।
उद्दिष्टस्य मितिर्ज्ञेया तस्मादुद्दिष्टता मता ॥ २१५ ॥
कृपाधावेव भट्टं स्यात् सङ्ख्यालाघवपूरःसरम् ।
वैरङ्कैर्नष्टसंख्या स्यान्मूलैकाङ्कसमन्वितः ॥ २१६ ॥
तेष्वेवात्र क्षिपेल्लोष्टं लोष्टस्थानमितिस्वरः ।
अक्षरोद्धरणेनैव मूलं त्यक्त्वा क्रमो भवेत् ॥ २१७ ॥
अथवा लोष्टसङ्ख्यास्थो लोष्टस्थानं स्वरस्य च ॥ २१८ ॥

इति मृच्छ्रीना प्रस्तार-नष्टोद्दिष्ट-प्रकरणम् ।

गानक्रियोच्यते वर्णः स चतुर्धा निरूपितः ।
स्थाय्यारोह्यवरोही च सञ्चारीत्यत्र लक्षणम् ॥ २१९ ॥
स्थित्वा स्थित्वा प्रयोगः स्यादेकैकस्मिन् स्वरे पुनः ।
स्थायी वर्णः स विज्ञेयः परावन्यर्थनामकौ ।
एतत् संमिश्रणाद्वर्णः सञ्चारी परिकीर्त्तितः ॥ २२० ॥

इति वर्णलक्षणम् ।

क्रमेण स्वरसन्दर्भमलङ्कारं प्रचक्षते ।
तस्य भेदास्तु भूयांसस्तत्र स्थायिगतान् ब्रुवे ॥ २२१ ॥
येषामाद्यन्तयोरेकस्वराः स्थायिवर्णगाः ।
प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्तसंज्ञकः ॥ २२२ ॥
ततः प्रसन्नमध्यः स्यात् पञ्चमः क्रमरेचितः ।
प्रस्तारोऽथ प्रसादः स्यात् सप्तैते स्थायिवर्णगाः ॥ २२३ ॥
प्रसन्नो मन्द्रपर्य्यायः प्रसन्नादिस्तदाद्यकः ।
प्रसन्नान्तस्तदन्तः स्यान्मन्द्राद्यन्तस्तृतीयकः ।
चतुर्थो मन्द्रमध्यः स्यात् क्रमाच्च क्रमरेचितः ॥ २२४ ॥
प्रस्तारोऽन्वर्थनामा स्यात् प्रसादस्तु प्रसन्नता ।
तार्क्षरेखागिरास्तारो मन्द्रो बिन्दुगिरा भवेत् ॥ २२५ ॥
भद्रो नन्दो जितः सोमो ग्रीवो भालः प्रकाशकः ।
इत्यन्यान्यपि नामानि मुनयः संगिरन्ति हि ॥ २२६ ॥
यमारभ्याग्रिमं गत्वा पुनः पूर्व्वस्वरं वदेत् ।
भद्रस्तं मनलङ्कारमाङ्गनेयोऽवदत् सुधीः ॥ २२७ ॥
एकैकस्य स्वरस्यात्र ज्ञानादेव क्रमो भवेत् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

स रि ग। रि ग रि। ग म ग। म प म।
प ध प। ध नि ध। नि स नि। स नि स ॥

इति भद्रः। प्रस्तारादिः। १।

नन्दः स्याद्रूपकेनात्र स्वरद्वन्द्वेन पूर्ववत् ॥ २२८ ॥

सस रिरि सस। रिरि गग रिरि।
गग मम गग। मम पप मम।
पप धध पप। धध निनि धध।
निनि सस निनि। सस निनि सस ॥

इति नन्दः। प्रस्तारान्तः। २।

जितः स्याद्गुरुकालेन स-ग-रि-सेत्ययं क्रमः।

स ग रि स। रि म ग रि। ग प म ग।
म ध प म। प नि ध प। ध स नि ध॥

इति जितः। प्रस्तारान्तः। ३।

गुरुकालेन सोमः स्यात् स्वरद्वन्द्वेन पूर्ववत् ॥ २२९ ॥

सस गग रिरि सस। रिरि मम गग रिरि।
गग पप मम गग। मम धध पप मम।
पप निनि धध पप। धध सस निनि धध ॥

इति सोमः। प्रस्तारान्तः। ४।

स-गौ रि-गौ समुच्चार्य्यं म-गौ रि-सौ तथैव च।
ग्रीवं लघुद्वयेनात्र हनूमानवदत् सुधीः ॥ २३० ॥

स ग रि ग ध ग रि स। रि म ग म प म ग रि।
ग प म प ध प म ग। म ध प ध नि ध प म।

प नि ध नि ध नि ध प ॥

इति ग्रीवः। क्रमरेचितः। ५।

स-गौ रि-मौ समुच्चार्य्यं म-गौ रि-सौ तथैव च।
द्रुताभ्यां लघुकालेन भालं वदति मारुतिः ॥ २३१ ॥

स ग रि म म ग रि स। रि म ग प प म ग रि।
ग प म ध ध प म ग। म ध प नि नि ध प म।
प नि ध स स नि ध प ॥

इति भालः। प्रस्तारः। ६।

मौरी-नौ मो ग-री गश्च रि-सावितिं स्वरैश्च तैः।
हनुमान्नंड्डतालेन प्रकाशाख्यन्तमब्रवीत् ॥ २३२ ॥

सस रिरि गग मगरि गरिस।
रिरि गग मम पमग मगरि।
मम पप धध निधप धपम।
पप धध निनि सनिध निधप।

इति प्रकाशः। प्रसादः। ७।

यत्र चानुच्यते कालः स्वरैस्तत्र तु बोध्यते।
स्रोतां विस्तीर्ण-निष्कर्षौ बिन्दुरभ्युच्चयः परः ॥ २३३ ॥
हसितं प्रेङ्खिताच्चिह्नौ सन्धिप्रच्छादनस्तथा।
उह्लीतोद्वाहितौ तद्वत् त्रिवर्णं वेणिरित्यतौ ॥ २३४ ॥
मूर्च्छनादेः स्वराद्यत्र क्रमेणारोहणं भवेत्।
स्थित्वा स्थित्वा स्वरैर्दीर्घैः सविस्तीर्णोऽभिधीयते ॥ २३५ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

सा रो गा मा पा धा नी सा ॥

इति विस्तीर्णः । १ ।

ऋक्षैः स्वरैः स निष्कर्षोद्विद्विरुक्तौ निरन्तरैः ।

सस रिरि गग मम पप धध निनि सस ॥

इति निष्कर्षः । २ ।

त्रिचतुर्या स्वरोच्चारो गात्रवर्णमिमं विदुः ।

निष्कर्षस्यैव द्वौ भेदौ केचिदेतौ बभाषिरे ॥ २३६ ॥

सस स । रिरि रि । गग ग । मम म ।

पप प । धध ध । निनि नि । सस स ।

सस सस । रिरि रि । गग ग । मम म ।

पप प । धध ध । निनि नि । सस स ।

इति गात्रवर्णः । ३ ।

आद्यं दीर्घत्रयं प्राहुर्द्वितीयं ऋक्षमेव च ।

विन्दु र्विन्दुत्रयेणापि हनूमान् सार्द्धविन्दुना ॥ २३७ ॥

सासासारि । रोरोरीग । गागागाम । मामामाप ।

पापापाध । धाधाधानि । नीनीनीस ॥

इति विन्दुः । ४ ।

एकान्तरस्वरारोहमाङ्गरभ्युच्छ्रयं बुधाः ॥ २३८ ॥

यत्रैकोत्तरवृद्ध्याभिरावृत्तिभिरुदीरिताः ।

आरुह्यन्ति स्वराः प्राहुर्हसितं तं शिवप्रियः ॥ २३९ ॥

स्वरद्वयं समुच्चार्य्य पूर्व्वपूर्व्वयुतं परम् ।

यदान्दोलितमारोहे प्रेङ्खितस्य क्रमं जगुः ॥ २४० ॥

स । सरि । सरिग । सरिगम । सरिगमप ।

सरिगमपध । सरिगमपधनि । सरिगमपधनिस ॥

व्यत्यया

स । रिरि । गगग । मममम । पपपपप ।

धधधधधध । निनिनिनिनिनि । सससससससस ॥

इति हसितः । ५ ।

स्वरद्वयं समुच्चार्य्य पूर्व्वपूर्व्वयुतं परम् ।

यदान्दोलितमारोहे प्रेङ्खितस्य क्रमं जगुः ॥ २४१ ॥

सारो । रीगा । गामा । मापा । पाधा । धानी । नीसा ॥

इति प्रेङ्खितः । ६ ।

एकान्तरस्वरद्वन्द्वं त्यक्तपूर्व्वयुतं परम् ।

क्रमादारोहणं यत्र तदाक्षिप्तं प्रचक्षते ॥ २४२ ॥

सरगग । रिरिमम । गगपप । ममधध । पपनिनि । धधसस ॥

इत्याक्षिप्तः । ७ ।

ऋक्षमाद्यद्वयं कृत्वा दीर्घं कृत्वा तृतीयकम् ।

हनुमानाह सर्व्वज्ञः सन्धिप्रच्छादनं परम् ॥ २४३ ॥

सरिगा । रिगमा । गमपा । मपधा । पधनी । धनिसा ॥

इति सन्धिप्रच्छादनः । ८ ।

आद्यं द्विवारमुच्चार्य्य स्वरं द्वितीयमेकदा ।

तथा दीर्घं तृतीयञ्च तदोद्गीतः प्रकीर्त्तितः ॥ २४४ ॥

सस रिरि गा । रिरि गग मा । गग मम पा ।

मम पप धा । पप धध नी । धध निनि सा ॥

इत्युद्गीतः । ९ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

आद्यं स्वरं चतुर्द्वारं द्विवारञ्च द्वितीयकम् ।
सञ्चरुक्तं तृतीयन्तु तथा सञ्चरुचतुर्थकम् ।
उद्घाटितस्त्वलङ्कारो हनूमता प्रकीर्त्तितः ॥ २४५ ॥

स स स स रि रि ग म । रि रि रि रि ग ग म प ।
ग ग ग ग म म प ध । म म म म प प ध नि ॥
प प प प ध ध नि स ॥

इति उद्घाटितः । १० ।

तृतीयस्य विराट्त्वौ द्विवर्णं वर्णयत्यमुम् ।

स रि ग ग ग । रि ग म म म । ग म प प प ।
म प ध ध ध । प ध नि नि नि । ध नि स स स ॥

इति त्रिवर्णः । ११ ।

त्रयाणान्तु विराट्त्वौ पृथग्वेणिरुदीरितः ॥ २४६ ॥

स स स रि रि रि ग ग ग । रि रि रि ग ग ग म म म ।
ग ग ग म म म प प प । म म म प प प ध ध ध ।
प प प ध ध ध नि नि नि । ध ध ध नि नि नि स स स ॥

इति पृथग्वेणिः । १२ ।

इत्यारोहद्वाराः ।

अवरोहक्रमादेते द्वादशाप्यवरोहिणः ।
गौरवादवरोहस्य लेखनं न कृतं मया ॥ २४७ ॥

इत्यवरोहद्वाराः ।

मन्द्रादिर्मन्द्रमध्यश्च मन्द्रान्तः स्यादतःपरम् ।
प्रसारश्च प्रसादोऽथ व्याहृतश्चेति सप्तधा ॥ २४८ ॥

परिवर्त्तोऽथ आक्षेपो विन्दुसंज्ञस्ततःपरम् ।
पयोद्वाहित ऊर्म्मिः स्यात् समः प्रेङ्खस्ततःपरम् ॥ २४९ ॥
ततो निष्कूजितः श्लेषः क्रम उद्घाटितः परम् ।
रञ्जितः सन्निवृत्तश्च प्रवृत्तो वेणुसंज्ञकः ॥ २५० ॥
ललितस्वर-झङ्कारौ द्वादशानावलोकितौ ।
सञ्चारिणोऽप्यलङ्काराः पञ्चविंशतिरीरिताः ॥ २५१ ॥
सञ्चारिताश्च सर्व्वत्र सञ्चारिणो यतस्ततः ।
मन्द्रो विन्दुश्चिरा श्लेषस्तारो मक्षकरेखकः ॥ २५२ ॥
स-री ग-मौ म-गौ यत्र रि-सौ स-री ग-री स-रौ ।
ग-मौ गुरुद्वयेनैव स मन्द्रादिस्तदा भवेत् ।
स्थानत्रयविशिष्टोऽयमारम्भे मन्द्रपूर्व्वकः ॥ २५३ ॥

सरिगम मगरिस सरिगरि सरिगम ।
रिगमप पमगरि रिगमग रिगमप ।
गमपध धपमग गमपम गमपध ।
मपधनि निधपम मपधप मपधनि ।
पधनिस सनिधप पधनिध पधनिस ॥

इति मन्द्रादिः । १ ।

एवं श्लेषोऽवरोहस्तु गीतशास्त्रविचक्षणैः ॥ २५४ ॥
स-गौ रि-गौ म-गौ यत्र रि-गौ रि-गौ रि-सौ स-री ।
ग-मौ ज-गणयुक्तोऽसौ मन्द्रमध्यो सुशोभितः ॥ २५५ ॥

सगरिग मगरिग रिगरिस सरिगम ।
रिगमप पमगम गमगरि रिगमप ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ग प म प ध प ग प म प म ग ग म प ध ।
म ध प ध नि ध प ध प ध प म म प ध नि ।
प नि ध नि ध नि ध नि ध नि ध प ध नि ध ॥

इति मन्द्रमध्यः । २ ।

मन्द्रान्तश्च स विज्ञेयो न-गणेन सुशोभितः ।
स-द्वयं रि-द्वयं गौ च यस्मिन् म-गौ रि-गौ रि-सौ ।
मन्द्रस्थानञ्च यस्यान्ते मन्द्रान्तं तं प्रचक्षते ॥ २५६ ॥

स स रि रि ग ग म ग रि ग रि स ।
रि रि ग ग म म प म ग म ग रि ।
ग ग म म प प ध प म प म ग ।
म म प प ध ध नि ध प ध प म ।
प प ध ध नि नि नि ध नि ध प ॥

इति मन्द्रान्तः । ३ ।

त्यक्तान्तरं स्वरद्वन्द्वं त्यक्ताद्यारभ्यते पुनः ।
युगं तादृक्समारोहे तदा प्रस्तार उच्यते ॥ २५७ ॥

स म । रि प । ग ध । म नि । ध स ॥

इति प्रस्तारः । ४ ।

आद्यं द्वयं त्रिरावृत्त्या तृतीयञ्च द्वितीयकम् ।
उक्ता तत्र प्रसादं तमलङ्कारं जगुर्बुधाः ॥ २५८ ॥

सरि सरि सरि गरि । रिग रिग रिग मग ।
गम गम गम पम । मप मप मप धप ।
पध पध पध निध । धनि धनि धनि सनि ॥

इति प्रसादः । ५ ।

स-गौ रि-मौ स-री गो मो यस्मिन्निति क्रमो भवेत् ।
व्यावृत्तं तं विजानीयाद्गीत-शास्त्रविशारदः ॥ २५९ ॥

स ग रि म स रि ग म । रि म ग प रि ग म प ।
ग प म ध ग म प ध । म ध प नि म प ध नि ॥
प नि ध स प ध नि स ॥

इति व्यावृत्तः । ६ ।

स-गौ रि-मौ म-री ग: स: स-री गो-म इति क्रम: ।
यदा भवेत् तदा ज्ञेयोऽलङ्कारश्चलितो बुधैः ॥ २६० ॥

स ग रि म म रि ग स स रि ग म ।
रि म ग प प ग म रि रि ग म प ।
ग प म ध ध म प ग ग म प ध ।
म ध प नि नि प ध म म प ध नि ।
प नि ध स स ध नि प प ध नि स ॥

इति चलितः । ७ ।

आद्यं तृतीयमुच्चार्य तूर्यं द्वितीयमेव च ।
परिवर्त्तसादा ज्ञेयो यति-तालेन शोभितः ॥ २६१ ॥

स ग म रि । रि म प ग । ग प ध म ।
म ध नि प । प नि स ध । ध स रि स ॥

इति परिवर्त्तः । ८ ।

क्रमात् स्वरत्रयं यत्र जगुराक्षेपकं बुधाः ॥ २६२ ॥

सरिग । रिगम । गमप । मपध । पधनि । धनिस ॥

इत्याक्षेपः । ९ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

आद्यो दीर्घस्त्रिराहत्तः स्वरो ह्रस्वस्तदुत्तरः ।
पुनराद्यस्तु दीर्घोऽपि तथा दीर्घस्तृतीयकः ।
बिन्दुसंज्ञे त्वलङ्कारे प्रोक्ता गीतविचक्षणैः ॥ २६३ ॥

सा सा सारिसा गा । री री रीगरी मा ।
गा गा गामगा पा । मा मा मापमा धा ।
पा पा पाधपा नी । धा धा धानिधा सा ॥

इति बिन्दुः । १० ।

स-रि-ग-रीत्यलङ्कार उद्वाहिते स्वरा द्वये ॥ २६४ ॥

स रि ग रि । रि ग म ग । ग म प म ।
म प ध प । प ध नि ध । ध नि स नि ॥

इत्युद्वाहितः । ११ ।

आद्यान्तुर्यस्त्रिराहत्तः पुनराद्यचतुर्थकः ।
इत्येते स्फुरलङ्कारे ऊर्म्मिसंज्ञे सुखप्रदे ॥ २६५ ॥

स मममम । रि पपप रिप । ग धधध गध ।
म निनिनि मनि । प सससप स ।

इत्यूर्म्मिः । १२ ।

स-रि-गानां तथा मध्यारोहणह्यवरोहणम् ।
पुनरारोहणं यत्र सप्तमं वदति तं बुधाः ॥ २६६ ॥

स रि ग म म ग रि स स रि ग म ।
रि ग म प प म ग रि रि ग म प ।
ग म प ध ध प म ग ग म प ध ।
प ध नि स स नि ध प प ध नि स ॥

इति षष्ठः । १३ ।

द्वियन्तरे स्वरद्वन्द्वे त्यक्त्वादारभ्य ईदृशः ।
क्रमादेकैकहानाच्च प्रेङ्ख उक्तो मनीषिभिः ॥ २६७ ॥

सस ममम । रिरि पपप । गग धधध । मम निनि । पप सस ॥

इति प्रेङ्खः । १४ ।

आद्यद्वयौ द्विराहत्त्या पुनस्तावत् क्रमो भवेत् ।
क्रमादेकैकहानाच्च निष्कूजितः प्रकीर्त्तितः ॥ २६८ ॥

सस ममम सरिगम । रिप रिप रिगमप ।
गध गध गमपध । मनि मनि मपधनि ।
पस पस पधनिस

इति निष्कूजितः । १५ ।

आद्यस्वरः क्रमात् सर्व्वान् सृजन्नेकैकमावजेत् ।
अलङ्कारस्तु श्येनः स्यादनिबद्धः सुखप्रदः ॥ २६९ ॥

सरि सग मम पप धध नि स ।
रिग रिम रिप रिध रिनि रिस ।
गम गप गध गनि गस ।
मप मध मनि मस ।
पध पनि पस
धनि धस ।
निस ॥

इति श्येनः । १५ ।

[स-री रि-गौ ग-मौ चेति क्रमाख्यालङ्कृतिक्रमः ॥ २७० ॥

स रि रि ग ग म् । रि ग ग म म प ।

Digitization by Arya Samaj Charitable Foundation, Chennai

ग म म प प ध । म प प ध धनि ।

प ध धनि निध ॥

इति क्रमः । १६ ।]

स-गौ स-गौ स-री गो म इति क्रमो यदा भवेत् ।
उद्घाटितस्तदा ज्ञेय आन्दोलनेन शोभितः ॥ २७१ ॥

सग सग सरिगम् । रिम रिम रिगमप ।

गप गप गमपध । मध मध मपधनि ।

पनि पनि पधनिध ॥

इत्युद्घाटितः । १७ ।

स-गौ रि-गौ स-री गो स इति क्रमो यदा भवेत् ।
रञ्जितः स्यादलङ्कारः करुणा-ताल-शोभितः ॥ २७२ ॥

सग रिग सरिगम् । रिम गम रिगमप ।

गप मप गमपध । मध पध मपधनि ।

धनि धनि पधनिध ॥

इति रञ्जितः । १८ ।

स-रि-गा रि-ग-सा यत्र ग-रि-सा रि-ग-मास्तः ।
सन्निवृत्तः स विज्ञेयः सर्व्वदा सुखदायकः ॥ २७३ ॥

सरिग रिगम गरिस रिगम ।

रिगम गमप मगरि गमप ।

मपध पधनि धपम पधनि ।

पधनि धनिध निधप धनिध ॥

इति सन्निवृत्तः । १९ ।

सन्निवृत्तस्वरैरेव द्विगुणः सन् प्रवृत्तकः ।

इति प्रवृत्तकः । २० ।

वेणुः स-म-ग-मै-ज्ञेयः स-रि-ग-मै-स्तथैव च ॥ २७४ ॥

सगमग सरिगम । रिपमप रिगमप ।

गधपध गमपध । मनिधनि मपधनि ।

पधनिध पधनिध ॥

इति वेणुः । २१ ।

आद्यं तृर्य्यं तृतीयञ्च द्विरावृत्त्या रि-मौ स-री ।
ग-री स-री ग-मौ यत्र सुखदो ललितस्वरः ॥ २७५ ॥

सस मम गग रिम सरि गरि सरि गम ।

रिरि पप मम गरि रिग मग रिग मप ।

गग धध पप मग गम पम गम पध ।

मम निनि धध पम मप धप मप धनि ।

पप सस निनि धप पध निध पध निध ॥

इति ललितस्वरः । २२ ।

द्वाभ्यां द्वाभ्यां स्वराभ्यां य सम्बादिभ्यां स झङ्कृतिः ।

सस पप । रिरि धध । गग निनि । मम सम ।

इति झङ्कारः । २३ ।

[स-म-ग-रीत्यलङ्कारे ह्लादमाने स्वरा दृसे ॥ २७६ ॥

सम गरि । रिप मग । गध पम ।

मनि धप । पध निध ॥

इति ह्लादमानः । २४ ।]

Digitization by Arya Samaj Charitable Foundation, Chennai

आद्यं तृर्यं विराट्त्याऽवलोकितः प्रकीर्त्तितः ।

सस्स मममम । रिरिरि पपप । गगग धधध ।

ममम निनिनि । पपप समस ॥

इत्यवलोकितः । २५ ।

एवं सञ्चार्य्यलङ्कारा आरोहे चावरोहिणि ॥ २७७ ॥

पुनः सप्त च गीतज्ञैरलङ्काराः प्रकीर्त्तिताः ॥ २७८ ॥

इन्द्रनीलो महावज्त्रो निर्दोषःसौर-कोकिलौ ।

आवर्त्तकः सदानन्द इत्येषां लक्ष्म कथ्यते ॥ २७९ ॥

स-री ग-मौ ग-री यत्र स-री ग-री स-री ग-मौ ।

इन्द्रनीलः स विज्ञेयो ध्रुवतालेन शोभितः ॥ २०८ ॥

सरि गम गरि सरिगरि सरिगम ।

रिग मप मग रिगमग रिगमप ।

गम पध पम गमपम गमपध ।

मप धनि धप मपधप मपधनि ।

पध निस निध पधनिध पधनिस ॥

इतीन्द्रनीलः । १ ।

स-री ग-री स-री यत्र स-री गमौ तथैव च ।

वलङ्कारो महावज्त्रो मठतालेन शोभितः ॥ २७१ ॥

सरि गरि सरि सरिगम । रिग मग रिग रिगमप ।

गम पम गम गमपध । मप मप मप मपधनि ।

पध निध पध पधनिस ॥

इति महावज्त्रः । २ ।

स-री स-री ग-मावेति क्रम एव यदा भवेत् ।

निर्दोषः स्यादलङ्कारो रूपकेन सुशोभितः ॥ २८२ ॥

सरि सरि गम । रिग रिग मप ।

गम गम पध । मप मप धनि ।

पध पध निस ॥

इति निर्दोषः । ३ ।

स-री ततः स-री गश्चेत् ततः स-री ग-मौ तदा ।

सौराख्योऽयमलङ्कारो झम्पतालेन शोभितः ॥ २८३ ॥

स रि सरिग सरिगम । रिग रिगम रिगमप ।

ग म गमप गमपध । मप मपध मपधनि ।

प ध पधनि पधनिस ॥

इति सौरः । ४ ।

स-री गश्च स-री गो-म इत्येतैः कलिका भवेत् ।

त्रिपुटाख्येन तालेन कलितः कोकिलो भवेत् ॥ २८४ ॥

सरिग सरिगम । रिगम रिगमप ।

गमप गमपध । मपध मपधनि ।

पधनि पधनिस ॥

इति कोकिलः । ५ ।

स-री ग-री स-री स-श्च रि-स्वरस्तु स-री ग-मौ ।

यत्र क्षुरड्ड-तालेन तमावर्त्तं बुधा जगुः ॥ २८५ ॥

सरि गरि सरि सरि सरिगम ।

रिग मग रिग रिग रिगमप ।

Digitization by Arya Samaj Charitable Foundation, Chennai

गम पम गमृ गम गमपध ।

मप धप मप मप मपधनि ।

पध निध पध पध पधनिस ॥

इत्यावर्त्तः । ६ ।

स-रि-ग-मैः सदानन्दो लघुकालेन शोभितः ॥ २८६ ॥

सरिगम । रिगमप । गमपध । मपधनि । पधनिस ॥

इति सदानन्दः । ७ ।

गीतोपयोगिनः सप्त तालयुक्ताः प्रदर्शिताः ।

अलङ्काराः पुनः पञ्च रागोपयोगिनः स्मृताः ॥ २८७ ॥

चक्राकारोऽथवश्चैव शङ्खः पद्मनिभः स्मृतः ।

धारिद्रश्चेति तेषां हि लक्षणान्यपि कथ्यते ॥ २८८ ॥

स्वरैरिभिश्चतुर्भिश्च षड्जेनापि त्रिभीरिभिः ।

चक्राकारः स विज्ञेयश्चक्रसादृश्यरूपवान् ॥ २८९ ॥

रिरिरिरि स रिरिरि ।

ग ग ग ग रि ग ग ग ।

म म म स ग म स म ।

प प प प म प प प ।

ध ध ध ध प ध ध ध ।

निनिनिनि ध निनिनि ।

स स स स नि स स स ॥

इति चक्राकारः । १ ।

क्रमात्पूर्णान् स्वरान्मुक्त्वान्त्यादेकैकहानतः ।

अलङ्कारो जवोनाम प्रकाशितो हनूमता ॥ २९० ॥

स रि ग म प ध नि स नि ध प म ग रि स ।

स रि ग म प ध नि ध प म ग रि स ।

स रि ग म प ध प म ग रि स ।

स रि ग म प म ग रि स ।

स रि ग म ग रि स ।

म रि ग रि स ।

स रि स ॥

इति जवः । २ ।

दीर्घान्त्यस्य द्विराहृत्तिरुपान्त्यौ तदधःस्वरौ ।

यत्रेति स्वरसम्बन्धः शङ्खो ज्ञेयो मनीषिभिः ॥ २९१ ॥

सासा निध । नोनी धप । धाधा पम ।

पापा मग । मामा गरि । गागा रिस ॥

इति शङ्खः । ३ ।

स-री षड्जत्रयं रिक्त्वा पद्माकारोऽत्र ग-द्वयम् ॥ २९२ ॥

स रि म म स रि ग ग ।

रि ग रिरिरि ग म म ।

ग म गगग म प प ।

म प मममम प ध ध ।

प ध पपपप ध निनि ।

ध नि धधध नि स स ॥

इति पद्माकारः । ४ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

आद्यं स्वरं सदृत्योच्च विरावृत्त्या च सप्तमम् ।
वारिदः स्यादलङ्कारः क्रमादेकैकहानतः ॥ २९३ ॥

स तिरिरि । स धधध । स पपप । स ममम ।

स गगग । स रिरिरि । स ससस ॥

इति वारिदः । ६ ।

इति सर्वेऽप्यलङ्कारा अष्टधैव प्रकीर्त्तिताः ॥ २९४ ॥
अलङ्काराहिना रागा विस्तारं नाप्नुवन्ति हि ।
एतैः ज्ञात्वा प्रगातॄणां स्वरतालप्रवीणता ॥ २९५ ॥
अलङ्काराश्च रागेषु त्रिविधेषु त्रिधा मताः ।
त एते मेलभेदेन ज्ञानन्ताः शास्त्रसम्मताः ॥ २९६ ॥
मुहाः सुजातयः सप्त ताः षड्जादिस्वराभिधाः ।
आद्या षड्जा तु विज्ञेया द्वितीया चार्षभी स्मृता ॥२९७॥
गान्धारी तु तृतीया सा चतुर्थी मध्यमा परा ।
पञ्चमी पञ्चमी ज्ञेया षष्ठी तु धैवती पुनः ॥ २९८ ॥
सप्तमी स्यात् तु नैषादी तासां लक्ष्म च कथ्यते ।
द्रुमावंशस्वरे स्थित्वा स्थित्वा यदि विलम्बितः ॥ २९९॥
गायेतां जातयस्ताभ्युत्तरदंशस्वराभिधाः ।
रागाणां जीवभूता ये प्रोक्तास्तेऽंशस्वरा बुधैः ॥ ३०० ॥
एकास्खलनसंजातभावितः स्वर उच्यते ।
च्यवनं जायते येषु तस्मात्ते च्यविता मताः ॥ ३०१ ॥

• • • • • •

शारीरोऽपि स विज्ञेयो ध्यानत्यागेन सम्मतः ।

एकत्र कम्पितो ज्ञेयो ध्वनाभ्यां स्वरद्वयम् ॥ ३०२ ॥
प्रत्याहृत इति ख्यातो ध्वन्येकया स्वरद्वयम् ।
एकत्र ध्वन्यते यस्तु द्विवारं स द्विराहृतः ॥ ३०३ ॥
स्फुरितो गमको ज्ञेयो ध्वन्याऽत्यन्तं स्वरद्वयम् ।
यत्र च ध्वनाद्दूर्द्धं तत्रैवानाहृतः स्वरः ॥ ३०४ ॥
गमकः शान्तसंज्ञोऽसाविति सूरिविनिर्णयः ।
चतुर्थांशाऽपरेभ्योऽसौ द्रुतस्य तिरिपो मतः ॥ ३०५ ॥
एकतास्खलनादेव सर्वे ते बोधिता यदा ।
स्वरानष्टावभिव्याप्तास्तदा वर्षण उच्यते ॥ ३०६ ॥
अववर्षणमप्येवं ज्ञेयं लक्ष्मविचक्षणैः ।
विकर्षणः स विज्ञेयः स्वस्थानेऽन्यं विकर्षति ॥ ३०७ ॥
अग्रे गत्वा निवृत्तोऽसौ पुनःस्वस्थान उच्यते ।
पश्चाद्गत्वा निवृत्तोऽसावग्रस्वस्थानसंज्ञकः ॥ ३०८ ॥
रेफयुक्तस्य वर्णस्य कारणं कर्त्तरी मता ।
मध्यमातर्जनीभ्यां या क्रमात् सा सम्भवा वहिः ॥ ३०९ ॥
यदुद्दिश्य क्रियारम्भस्तस्यैव श्रवणं स्फुटः ।
स्वरस्याभिभवान्नैव्यगम्यस्याद्धर्मनीपिणः ॥ ३१० ॥
स्वरद्वयमभिव्याप्य मुहालुः पूर्ववद्भवेत् ।
ह्रस्वितस्यैकदेशत्वान्मुद्रा न पृथगुच्यते ॥ ३११ ॥
एवंलक्षणसंयुक्ता गमका बहवो मताः ।
न ते मयोदिताः सर्वा ग्रन्थविस्तारभीतिना ॥ ३१२ ॥

इति गमकाः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वरस्य हेतुभूतायां वीणायामनुपूर्वतः ।
तत्र स्वरविबोधार्थं स्थानलक्षणमुच्यते ॥ ३१३ ॥
ध्वन्यवच्छिन्नवीणायां मध्ये तारक-सः स्थितः ।
उभयोः षड्जयोर्मध्ये मध्यमं स्वरमाचरेत् ॥ ३१४ ॥
त्रिभागात्मकवीणायां पञ्चमः स्यात्तदग्रिमे ।
षड्जपञ्चमयोर्मध्ये गान्धारस्य स्थितिर्भवेत् ॥ ३१५ ॥
स-पयोः पूर्वभागे च स्थापनीयोऽथ रि-स्वरः ।
स-पयोर्मध्यदेशे तु धैवतं स्वरमाचरेत् ॥ ३१६ ॥
तत्रांशद्वयसंत्यागान्निषादस्य स्थितिर्भवेत् ॥ ३१७ ॥

इति शुद्धस्वराः ।

भागत्रयान्विते मध्ये मेरो ऋषभसंज्ञितात् ।
भागद्वयोत्तरं मेरोः कुर्य्यात् कोमल-रि-स्वरम् ॥ ३१८ ॥
मेरु धैवतयोर्मध्ये तीव्रगान्धारमाचरेत् ॥ ३१९ ॥
भागत्रयविशिष्टेऽस्मिन् तीव्रगान्धार-षड्जयोः ।
पूर्वभागोत्तरं मध्ये मं तीव्रतममाचरेत् ॥ ३२० ॥
भागत्रयान्विते मध्ये पञ्चमोत्तरषड्जयोः ।
कोमलो धैवतः स्याच्च पूर्वभागे मनीषिभिः ॥ ३२१ ॥
तथैव ध-सयोर्मध्ये भागत्रयसमन्विते ।
पूर्वभागद्वयादूर्द्धं निषादं तीव्रमाचरेत् ॥ ३२२ ॥
ऋषभः शुद्ध एवासौ पूर्वगान्धार इष्यते ।
गान्धारः शुद्ध एवासौ रिक्षीव्रतर इष्यते ॥ ३२३ ॥
अतितीव्रतमो गः स्यान्मध्यमः शुद्ध एव हि ।

Digitization by Arya Samaj Charitable Foundation, Chennai

धैवतः शुद्ध एवासौ निषादः पूर्वसंज्ञकः ।
निषादः शुद्ध एवासौ धैवतीवतर दृश्यते ॥ ३२४ ॥
एवं स्यात् सर्व्वयन्त्रेषु स्वरस्थानस्य लक्षणम् ॥ ३२५ ॥

इति विकृतस्वराः ।

स्वरज्ञानविहीनेभ्यो मार्गोऽयं बोधितो मया ।
स्वरसम्वादिताज्ज्ञानं स्वरस्थापनकारणम् ॥ ३२६ ॥
प्रवर्त्तन्ते स्वराः सर्व्वे सदा सम्वादिरूपिणः ।
षड्ज-पञ्चम-भावेन षड्जे ज्ञेयाः स्वरा बुधैः ।
ग-नि-भावेन गान्धारे म-स-भावेन मध्यमे ॥ ३२७ ॥

इति स्वरस्थानलक्षणम् ।

अथ शुद्धैः स्वरैर्मेला: कथ्यन्ते विकृतैरपि ।
तेषां मितिः ख-वेदौ च वह्निश्चन्द्रहयं तथा ॥ ३२८ ॥
मेलः स्वरसमूहः स्याद्रागव्यञ्जनशक्तिमान् ।
श्लिष्टोच्चारणमेवात्र स द्वारः प्रकीर्त्तितः ॥ ३२९ ॥
आद्याद्यन्यूर्च्छनाभिश्च मेला ज्ञेया विचक्षणैः ॥ ३३० ॥
सप्तभिश्च स्वरैः पूर्णः षड्भिस्तैः षाड़वो मतः ।
औड़वः पञ्चभिः प्रोक्त एवं मेलस्त्रिधा मतः ॥ ३३१ ॥
षाड़वा औड़वाः षड्जं विना मेला न ते मताः ।
शुद्धत्वविकृतत्वाभ्यामिति मेला मयोदिताः ॥ ३३२ ॥
तत्र ये च प्रसिद्धाः स्युरुक्तका ये विशेषतः ।
लक्षणानि ब्रुवे तेषां सम्मत्या च हनूमतः ॥ ३३३ ॥
गीतियुक्ताश्च ये रागाः शुद्धास्ते शास्त्रसम्मताः ।

मेल-तालिका ।

"अथ शुद्धैः स्वरैर्मेलाः कथ्यन्ते विकृतैरपि । तेषां मितिः ख-वेदौ च वह्निश्चन्द्रहयं तथा ॥"



Digitization by Arya Samaj Charitable Foundation, Chennai

शुद्धा भिन्ना ततो गौड़ी वेसरा च ततःपरम् ।
साधारणीति पञ्चैतास्तासां लक्षणमुच्यते ॥ ३३४ ॥
शुद्धा वक्रस्वरा ज्ञेया ललितस्वरसंयुता ।
भिन्ना स्खलत्स्वरैर्युक्तैर्मधुरैर्गमकैर्युता ॥ ३३५ ॥
आरोहणावरोहाभ्यां स्थानत्रयसुशोभिता ।
अखण्डितस्थितिः स्थानत्रये गौड़ी मता सताम् ॥ ३३६ ॥
स्फुम्फितकम्पिताभ्याञ्चाऽनुद्भुतसरलैः स्वरैः ।
वेगस्वरैश्चतुर्भिश्च वर्णैः सा वेसरा मता ॥ ३३७ ॥
चतुर्गीतगतं लक्ष्म स्थिता साधारणी मता ॥ ३३८ ॥

इति गीतयः ।

रञ्जकः स्वरसन्दर्भो राग इत्यभिधीयते ।
सर्वेषामपि रागाणां समयोऽत्र निरूप्यते ॥ ३३९ ॥
धनाश्रीर्मालवश्चीच्च रक्तहंसो वसन्तकः ।
देशाख्यो देशकारी च भूपाली प्रसभस्तथा ॥ ३४० ॥
मध्यमादिः कोलहासो वङ्गाली भैरवस्तथा ।
नारायणी विभासश्च प्रातर्गेया इमे बुधैः ॥ ३४१ ॥
गुर्ज्जरी वेरगुप्तिश्च कौमारी कज्जली तथा ।
शङ्कराभरणश्चोड़ी लोरठी रामक्रस्तथा ॥ ३४२ ॥
नादरामक्रियारागो वेलावली कुडाविका ।
गुणकरी त्रयवीच्च तथैव शिवचन्द्रिका ॥ ३४३ ॥
एते रागा प्रगीयन्ते प्रथमप्रहरोत्तरम् ॥ ३४४ ॥
हंसाख्यो दीपको रागः कान्भोदी कङ्कणस्तथा ।

सारङ्गो देवगान्धारी रागो देवगिरिः परा ॥ ३४५ ॥
ऐरावतोऽर्ज्जुनो रागो रत्नावली ततःपरम् ।
आसावरी च हिन्दोलो मनोहरस्तथैव च ॥ ३४६ ॥
वैजयन्ती तथा रागाः सर्व्वाश्चैव वराटिकाः ।
एते रागा प्रगीयन्ते द्वितीयप्रहरोत्तरम् ॥ ३४७ ॥
घण्टारागस्तथा ढक्कः श्रीरागः कोकिलः पुनः ।
सौदामिनी कुरङ्गश्च त्रिवणी च सुरालयः ॥ ३४८ ॥
पूर्व्वो विहङ्गड़ो रागः सामन्तः कुमुदस्तथा ।
वड़हंसः पहाड़ी च चक्रधारस्तथैव च ॥ ३४९ ॥
कल्याणाख्यवराली च मञ्जुभाषा ततःपरम् ।
सिंहरवस्तथा रागस्तथैव पठमञ्जरी ॥ ३५० ॥
सर्व्वे गौलास्तथा नाटाः कल्पतरुस्तथैव च ।
एते रागाः प्रगीयन्ते तृतीयप्रहरोत्तरम् ॥ ३५१ ॥
सैन्धवो मेघरागश्च मल्लारी पञ्चमस्तथा ।
नीलाम्बरी सुधारी च भैरवी ललितस्तथा ॥ ३५२ ॥
मेघनादस्तथा देशो रागो मङ्गलकोशकः ।
गौण्डरागश्च मल्लारो राग आनन्दभैरवी ॥ ३५३ ॥
शङ्करानन्दभानश्चौ राजधानी च शर्व्वरी ।
सावेरीराग इत्येताः सर्व्वदा च सुखप्रदाः ॥ ३५४ ॥
यत्साधारणधर्म्मा ये लक्षणत्वेन कीर्त्तिताः ।
तैरेव रागभेदाः स्युस्तांस्तु वक्ष्येऽत्र कालतः ॥ ३५५ ॥
न्यासांशौ यत्र नोच्येते तत्र षड्जं विदुर्बुधाः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

आदावुद्गृह्यते येन स तानोद्ग्राहकारकः ॥ ३५६ ॥
शुद्धमेलोद्भवः पूर्णो धैवतादिकमूर्च्छनः ।
आरोहे ग-नि-वर्ज्जः स्याद्रागः सैन्धवनामकः ।
आम्रेडितस्वरैर्युक्तः स्फुरितेन च शोभितः ॥ ३५७ ॥
धसरिमगपधधसा । सनिधधपमपमागगगरिस । धसरिमगरिगरि
पमगरि । निनिधमपमगरि । पपधगरिगगगरिस ॥

इति सैन्धवः । सर्व्वकालीयः । १ ।

आरोहे रि-ध-हीना स्यात् पूर्णा शुद्धस्वरैर्युता ।
गान्धारस्वरपूर्व्वा स्यात् धनाश्रीर्मध्यमान्तका ॥ ३५८ ॥
गमपनिस । रिसनिधपम । गमपमगरिस । गमपनिपनिसरिसनिसनि
धपम । गमपमपमागमगरिस । गमगमपनिपनिसगसमा । पमपमग .
रिस । निधपम । गमपमपगरिमापनिसरिमनिसस ॥

इति सम्पूर्ण-धनाश्रीः । प्रातःकालीया । २ ।

ध-नाश्रीव ध-हीना सा रि-ध-हीनापि सम्मता ॥ ३५९ ॥

इति षाड़व धनाश्रीः । ३ । द्व्यौड़व-धनाश्रीः । ४ ।

षड्जादिमूर्च्छनोपेतः षड्जत्रयसमन्वितः ।
ग-नि-हीनोऽपि मल्लारो वर्षासु सुखदायकः ॥ ३६० ॥
यतो वर्षासु गेयोऽयं मेघ इत्यपि कीर्त्तितः ।
अकालरागगानेन जातदोषं हरत्ययम् ॥ ३६१ ॥
सगासारिमपधसधपमरिस । सरिमरिमपधधसासाधपधरिसगासा
धसधपधधमगरिसासधरिमरिमपमरिसरिधरिधसधसा ॥

इति मेघो मल्लारोऽपि । सर्व्वदा । ५ ।

नीलाम्बरी तु सम्पूर्णा षड्जपूर्व्वकमूर्च्छना ।
शुद्धमेलसमुद्भूता वड्डकम्पमनोहरा ॥ ३६२ ॥
धंगन्यासौ प-मौ यत्र ग-री स-नी तथैव च ।
षड्जात्पञ्चम उन्नानं पञ्चमात् स-स्वरे पुनः ॥ ३६३ ॥
सरिगमपधनिसासनिधपमपमासरिगमपमागरिगमपमरिगसससप्पपमप
पपपपपम । पप्पमपप्पमनिधपमगरिगमपससरिगमसपधनिधपमगरि
गमपमगरिसगापगागरिगमागमरिसरिसासससससनिसससनिधनिसरि
सनिसस ॥

इति नीलाम्बरी । सर्व्वदा । ६ ।

रि-हीना मालवश्रीः स्यात् शुद्धमेलस्वरोद्भवा ।
मध्यमादिस्वरोद्ग्राहा धांशयुक्तान्यपा स्मृता ॥ ३६४ ॥
मपधनिसगसनिसनिधधपधधपमपपमगसाधधधपमनपापा । निध
निसमगसगसनिसनिनिधपधधपमपापामागसनिधनिसस्सु ॥

इति मालवश्रीः । प्रातःकालीया । ७ ।

ग-हीनो रक्तहंसः स्यादारोहे नि-स्वरोज्झितः ।
अवरोहे ध-वर्ज्जः स्यात् पञ्जपूर्व्वकमूर्च्छनः ॥ ३६५ ॥
सरिमपधससनिपपरिस । सारिमपधसरिमपधपधापपमारिमरिस
धससा ॥

इति रक्तहंसः । प्रातःकालीयः । ८ ।

रि-स्वरादिस्वरारभ्या रि-कोमल-ध-कोमला ।
ग-तीव्रा सा नि-तीव्रा च गौरी न्यंशस्वरा मता ।
आरोहे ग-ध-हीना सा नि-कम्पन-मनोहरा ॥ ३६६ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

आरोहे यदि गान्धारो मध्यमावधिमूर्च्छना ॥ ३६७ ॥

रिमपनीसानिधपमगरिगरिसा । निसरिमागरिगरिसानिनिसनिस ।
निधपमपसधपमपमगरिगरिसानीसानीसा । सपधपमगरिसनीसा ।
रिमपमगरिमगरिनीसा । रिमागरिगरिसानीसानिधपमगरिसनीसा ।
रिरिगामगरिसासससमा ॥

इति गौरी । तृतीयमूर्छनोत्तरम् । ८ ।

गौरीमेलसमुद्भूता मल्लारी नि-खरोज्झिता ।
आरोहणे ग-हीना स्यात् षड्जादिस्वरसम्भवा ॥ ३६८ ॥

सरिगपधसरि । सधसधपगपमागरिसरिरिगसधमारिमपमगरिसरिम
सधससमासा । रिमपधमगपधसगरिरिरिरिमगरिसधधसधपमपामगरि
रिसधधससस ॥

इति मल्लारी । सर्व्वदा । १० ।

पञ्चमो रि-प-हीनः स्यात् तीव्रगः सादिमः सृतः ।
मध्यमन्याससंयुक्तो मध्यमांशेन शोभितः ॥ ३६९ ॥

सगमधनिसधनिसगमगसगमा । धनिसगमगमसनिधनिसनिधनिस
सनिसनिधमगसगमगमगस । निधनिसधासमागसनिधनिसासा ॥

इति पञ्चमः । सर्व्वदा । ११ ।

षड्जादिमूर्च्छिते सान्ते ग-नी तीव्रौ वसन्तके ॥ ३७० ॥

सरिगमपधनिसगनिधपमपगमा । गमपधनिधधमपमगमागमा ।
सरिगमपधसरिगमपमगरिसगनिधपधपमपमगमगमपमधधपगरिसनि
धनिसस्सा ॥

इति वसन्तः । प्रातःकालीयः । १२ ।

रि-तीव्रतरसंयुक्तो ग-तीव्रेणापि संयुतः ।
ध-ग-वर्ज्जोऽवरोहे स्यान्नान्यस्वरसमूर्च्छनः ।
तीव्रो यत्र निषादः स्याद्देशाख्यः स विराजते ॥ ३७१ ॥

गपधससनिपमममरिसगगपगपधसमपमममरिसरिसनिपगपधस
सस्सा । रिनीपामममरिसमनिपमपमसस्सा ॥

इति देशाख्यः । प्रातःकालीयः । १३ ।

देशकार्य्यां ग-नी तीव्रौ धांशो धादिकमूर्च्छना ॥ ३७२ ॥

• . . • . • . • . •

धनिसरिगमपधनिसनीधपमपमागरीसनीधमनिसस्सा । गमपधनिधध
पमपमगरीसनीधधनिसस्सा ॥

इति देशकारी प्रातःकालीया । १४ ।

ऋषभः कोमलो यत्र गान्धारः पूर्व्वसंज्ञकः ।
मुख्यार्य्यां धैवतोद्ग्राहो नि-धौ पूर्व्वाख्य-कोमलौ ।
आरोहे ग-नि-हीनायां न्यासांशौ षड्जपञ्चमौ ॥ ३७३ ॥

धसरिमपधनिनिधपमगगगरिसरिसध । धसरिमपपधधसरिगगरि
रिसनिधनिनिधपमपमागरिसरिसधपस्सा ।

इति हम्मीरी । सर्व्वदा । १५ ।

स-स्वरांशग्रहन्यासा भैरवी स्यात् ध-कोमला ।
रिगारोहे तु पन्यासा पञ्चमेनोभयोरपि ।
षड्जेनावरोहे तु सर्व्वदा सुखदायिनी ॥ ३७४ ॥

सरिगमपधनि । सनिधपमगरिस । सरिगमपमगरिसमगरिगरिसनिध
निसा । सगमगमगमपमगरिस । धापमगरिसगरिनिसगमगमगमपम

Digitization by Arya Samaj Charitable Foundation, Chennai

गरिस गगमनिनिधमगरिसगरिसनिनिसस्व ॥

इति भैरवी । सर्व्वदा । १६ ।

म-नि-वर्ज्जा तु भूपाली रि-धौ यत्र च कोमलौ ।
गान्धारोदृग्ग्रहसंयुक्ता रि-न्यासा गांग्रशोभिता ॥ ३७५ ॥

गपधसरिगरिसस्राधपगपगरिगरिसधसा । गपधसरिगरिगगगगरिरि
रिरिगरिगरिसधसस्वा ॥

इति भूपाली । प्रातःकालीया । १७ ।

षड्जादिमूर्च्छनोपेतः प्रसभः पञ्चमोज्झितः ॥ ३७६ ॥

सरिगमधनिसनिधमगरिस । गगरिसनिधनिसनिधमगरिसासरिगमध
निस । मगरिसनिध । निसनिधनिधमगगरिसनिसस्वा ॥

इति प्रसभः । प्रातःकालीयः । १८ ।

सोज्झितः कोडुडुप्लवः स्याद्गान्धारादिकमूर्च्छनः ।
अवरोहे ध-वर्ज्जः स्यात् षाडवः परिकीर्त्तितः ॥ ३७७ ॥

गपधनिसरिगरिसनिपगपगरिस । सरिगपधनिधनिपपगपपपधनि
सरिसनिसनिपगपगरिगरिसनिसस्वा ॥

इति कोडुडुप्लवः । प्रातःकालीयः । १९ ।

भैरवे तु रि-धौ नस्रौ षादिमे न्यासमध्यमे ।
तत्रोक्तौ तु ग-नी तीव्रौ कोमलौ धैवतः स्मृतः ॥ ३७८ ॥

धनिसगमधनिसगगसनिधनिसनिधनिनिगम । सगमधमगमगगसगसनि
धनिसधनिनिधनिसस्वा ॥

इतिभैरवः । प्रातःकालीयः । २० ।

कोमलाख्यौ रि-धौ तीव्रौ ग-नी वसन्त-भैरवे ।

धैवतांशग्रहन्यासो मध्यमांशोऽपि सम्मतः ॥ ३७९ ॥

धनिसरिगमपामागरीसानीधरिनिसानिधा । धनिसा । मगरिसनिध
रिनिसानिधा । धनीसस्वा । धनिसरिगस्वा । धधपमपमगगम । स
रिगमगरिसनिधनीसासा ॥

इति वसन्त-भैरवः । प्रातःकालीयः । २१ ।

मध्यमादौ ग-धौ नस्रौ मूर्च्छना मध्यमादिका ।
तत्र त्वंशस्वराः प्रोक्ता रि-म-नयो मुनीश्वरैः ॥ ३८० ॥

मपनिसरिमरिसनिसनिपमपनिपसपमरिमरिस । निसरिमरिसारिरि
रिरिमरिस । सरिसरिनिसा । निसनिपमगमरिमरिसनिसस्वा । नि
नीपनिसमारिसनिसस्वा ॥

इति मध्यमादिः । प्रातःकालीया । २२ ।

वङ्गाली रि-ध-हीना स्यान्मतीव्रतरसंयुता ।
नि-तीव्रेणापि संयुक्ता स-स्वरोत्थितमूर्च्छना ॥ ३८१ ॥

सगमपनिसगनिपगमगस । सगमपपनिपमपमगमपमगमगसनिसनिम
धनिसनिसगसनिसनिपमपनिपमपम । मनिसस्वा ॥

इति वङ्गाली । प्रातःकालीया । २३ ।

नारायणी ग-नी तीव्रौ गान्धारादिकमूर्च्छना ।
आरोहे म-नि-वर्ज्जा स्यान्न्यासांशधैवता स्मृता ॥ ३८२ ॥

पधसगनिधपमगमगरिस । सरिगसरिसरिसा । निधधसगसरिसरिगस
रिगसरिसरिसस्व निधासनिधधसगसरिसरियामगरिमगरिसगरिसरिगस
रिसस्वनिधपस्व ॥

इति नारायणी । प्रातःकालीया । २४ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

मस्तु तीव्रतरो यस्मिन् ग-नी तीव्रौ रि-धौ मतौ ।
कोमलौ न्यासधोपेते विभासे गादिमूर्च्छने ।
आरोहे म-नि-वर्ज्यत्वं ग-पांशस्वरसंयुते ॥ ३८३ ॥

गपधधरिगपामगारिसधनिधपधसधनिधनिधपगपमगारिसधरिसरिसध

Digitization by Arya Samaj Charitable Foundation, Chennai

निसरिसनिसनिसनिधपधपमपमगरिस । धापामोक्षा ॥

इति वराटिका । द्वितीयप्रकरोत्तरम् । २२ ।

अथ शुद्धरागाख्यां तु रि-गौ कोमल-पूर्व्वकौ ।
मस्तु तीव्रतरो धः स्यात् कोमलस्त्रीनि-स्वरः ।
धैवतोद्ग्राहयुक्तायां नि-सौ न्यासांशकौ स्मृतौ ॥ ३८१ ॥

धधनिसरिगमपमगरिसनीधपनीसा । रिगमगरिसरिसरिगमगरिसारि
सरिसरिसरिसनिसरिगरिमसरिसरिसनिधनिसधनिसरिसनिसनि । ध
निसपमधपमपम । मगमगरिसनिधनिधधनिसरम ॥

इति शुद्धवराटी । द्वितीयप्रकरोत्तरम् । २३ ।

रि-धौ च कोमलौ प्रोक्तौ यत्र तीव्रतरश्च मः ।
उद्ग्राहकौ प-धौ स्यातां वराटीतोडिका च सा ॥ ३८२ ॥

धधनिसगमपधधपमगपमगमगगरिस । गमपधधपमगमपधनिधनिसरि
सनिसनिधनिधपमगमधपधनिधनिसामागरिसरिधनिसरिसनिसनिधप
मगमपमगमगरिसनिधनिसरमा ॥

इति तोड़ीवराटी । द्वितीयप्रकरोत्तरम् । २४ ।

अथ नागवराख्यां तु मस्तु तीव्रतरो भवेत् ।
कोमलो धैवतः प्रोक्तो ग-धावुद्ग्राहकौ स्मृतौ ॥ ३८३ ॥

गमपधनिसरिसनिधपमगमपमगरिस । धधनिसनिसरिगरिगनिसनि
धपमगमपमगमगमगरिसधनिसरिसा । धधनिधनिसगरिसरिसनिधप
मगमगरिसनिधनिसरमा ॥

इति नागवराटी । द्वितीयप्रकरोत्तरम् । २५ ।

शुद्धरागाख्यवराख्यान्तु निषादस्त्रीस्वरांशकः ।

मस्तु तीव्रतरः प्रोक्तो ग-धावुद्ग्राहकौ स्मृतौ ॥ ३८४ ॥

गमपधनिधनिसरिसनिधपमगमपगरिस । धधनिसरिसनिधपमगमपम
पमगरिस । धधनिसरिसगरिसरिसनिस । धनिसरिसनिधपमपमगरि
सागमपधनिधमगरिस । निसगरिसनिस । धनिसरिसनिसरमा ॥

इति शुद्धागवराटी । द्वितीयप्रकरोत्तरम् । २६ ।

म-तीव्रतरसंयुक्ता प्रतापोपपदान्विता ।
वराटी च निना शुक्ता तीव्रसंज्ञेन गादिका ॥ ३८५ ॥

गमपधनिसरिगनिसनिधपमपमगमपमपग्मागरिसानिसगरिसरिसनिस ।
गमपधपमगगरिसनिसनिसगमपधनिसरिगरिसनिसनिधपमपमगमपमप
ग्मागरिस । निसगरिसरिसनिस । गमपधपमगगगरिसनिसनिसग
मपधनिसरिगरिसनिसनिधपपधपमगमगमगरिसरिगमपपधपम
पमगगगरिसरिसनिसरमा ।

इति प्रतापवराटी । द्वितीयप्रकरोत्तरम् । २७ ।

अथ शोकवराख्यान्तु रि-गौ कोमल-पूर्व्वकौ ।
मश्च तीव्रतरः प्रोक्तः कोमलो धैवतः स्मृतः ।
न्यासांशौ च स-नी यत्र मूर्च्छना च प-पूर्व्विका ॥ ३८६ ॥

धधनिसरिगमपधपमगरिसनीसा । सरिगमपधनिसनिधपमगगरिरिग
रिसरिसनिधनिधनिसरिसनिस । सरिगरिसनिसनिरिगनिरिसरिरिस
निसधनिनिसनिस । गरिसरिसनिस । सरिगमपमगरिसरिसरिसनिध
धनिसरिसनिसरमा ॥

इति शोकवराटी । द्वितीयप्रकरोत्तरम् । २८ ।

कल्याणोपपदा या सा वरालीगादिमूर्च्छना ।

Digitization by Arya Samaj Charitable Foundation, Chennai

कल्याणसेलसम्भूता म-पांगन्यासका स्मृता ॥ ३९७ ॥

गमपधनिसरिगरिगरिसनिधधनिसनीसा । नीधापामापमापपमग । गमपमगगारिस । नीधधनीसा । सरिगमपमधपममपपमगमगगारि सनीधधनीसरिसनीसगरिसधनीसधनीसरिसनीसस्था ॥

इति कल्याणसेलजा । तृतीयप्रकरोत्तरम् । ३९ ।

खस्थावती प-हीना स्यात् कोमलीकृतधैवता ।
गान्धारमूर्च्छनायुक्ता रिणा त्यक्तावरोहिका ॥ ३९८ ॥

गमधनिसरिसनिधमगगगगमा । गमधनिधमधनिसरिसनिसनिधमग गमगगारिसनिनिसगगमगमनिधमगगमगगारिस । रिरिसनिनिसस्था ।

इति खस्थावती । तृतीयप्रकरोत्तरम् । ४० ।

ध-कोमला नि-तीव्राद्या षड्जपूर्वकमूर्च्छना ।
ध-गयोः कम्पसंयुक्ता स पांगाभीरिका मता ।
आरोहणेऽवरोहेऽपि क्वचिन्मध्यमवर्जिता ॥ ३९९ ॥

सरिगमपधनिसस्था । निधापधधपमपपामपमगारीरिसनीस । (कम्पापन्यासत्वं सर्व्वत्रापि ।) धनिसगगारिसरिरिसनिसगमपधसप गारीसनीसमसपपमगरीसनिमसप । सरिगमपामपनिधापधधपमप मगारीसरिरिसनिसगसरिगमपधधपमपमगारिसरिसनिसस्था ॥

इत्याभीरिका । तृतीयप्रकरोत्तम् । ४१ ।

मस्तु तीव्रतरो यस्मिन् ग-नी तीव्रावितीरितौ ।
गान्धारोद्ग्राहकल्याणे नारोहे तिष्ठतो म-नी ॥ ४०० ॥

गपधसरिगरिगसनिधपधनिधधपपमगपमगगरिसरिगसरिगगसधनि

धपपधधपगमपमगपमगमगगारिस । मममनिधमगपधसरिगपमगगारि स । सरिगपपगधसनरिगरिसनिधपमनिधपधधपगमपमगगरिसधा निधपधसस्था ॥

इति कल्याणः । तृतीयप्रकरोत्तरम् । ४२ ।

रि-कोमला ग-तीव्रा या म-तीव्रतरसंयुता ।
ध-कोमला नि-तीव्रा च ख्याता रामकरीति सा ।
आरोहे म-नि-वर्ज्या स्यात् पांगा धैवतमूर्च्छना ॥ ४०१ ॥

धसरिगपमगारिसरिगपपधसगरिसनिधपधापमागमपमगगारि सनिधमगपधसनरिसरिगपपमगगारिसनरिगपाधधपगपपगमगगारि सारिरिसरिसरिगसरिगपगपधसनरिसनिधपधापमगरिस । सरिसरि सस्था ॥

इति रामकरी । प्रातःकालीना । ४२ ।

अतितीव्रतमो गः स्यान्मस्तु तीव्रतरो मतः ।
धस्तु तीव्रतरो निः स्यात् तीव्रः षड्जादिमूर्च्छने ।
स-न्यासे मध्यमांशे च रागे सारङ्गसंज्ञके ॥ ४०२ ॥

सरिगमपधनिस । सनिधपमगरिसा । सरिगमपपधसपमगमपमगमग रिस । सरिगरिसा ॥

इति सारङ्गः । द्वितीयप्रकरोत्तरम् । ४३ ।

रि-धौ तु कोमलौ यत्र ग-नी तीव्रौ च मालवे ।
षड्जावरोहणोद्ग्राहे स-रि-न्यासांशशोभिते ॥ ४०३ ॥

सासनिधपधनीधपमपपगमगारिस । (न्यासर्षभम् ।) सरपाधनीधपमप पमगमगारिसापमपामगारिरिरिरिरिरीस । पमगमरिसमरिगमपधनीध

Digitization by Arya Samaj Charitable Foundation, Chennai

पमपपमगमपमगमारिरिरिसाधनीधपमपपमगमासपामपागमारिरिस
नीसानीसानीधपमपगमापमगमारिरिसनीसरा ॥

इति नालवः । तृतीयप्रहरोत्तरम् । ३६ ।

रि-ध-कोमलरंयुक्ता ग-नि-वर्ज्जा गुणांकिया ।
धैवतोदग्राहसंयुक्ता क्वचिन्नान्धारसंयुता ॥ ४०४ ॥

धसरासधपमपा । पमगारिसा । सधधपमपपमगारिस । धरिगगगमग
रिस । धरिसरमगधधसरसरधपमगमगारिस । धरिरिरिरिसधसरसधध
मपाधमारिस । धरिगमगरिसा । सापधपमपमगमासमसारिसा । सध
रिसमापामगारिसरिरिरिसरा ॥

इति गुणक्री । प्रथमप्रहरोत्तरम् । ३६ ।

पञ्चमोदग्राहसम्पन्ने ध-हीने ककुभे पुनः ।
तीव्रगान्धाररागित्यारोहे चावदन् बुधाः ॥ ४०५ ॥

पनिसरिमागारिस । पनिसरिसरिनिसपपनिसरिमपमपनिपमपमाग
रिगरिस । पनिसरिसनिसरिसमपपनिसरिमागरिमपमागरिगरिस ।
निसरिमारिमारिसनिपमपनिस । निसरिमरिसमरिधनिस । पपनिपम
रिमरिमपमरिमरिमरिगरिसापनिसरिगरिस । निसरिगरिसनिसरा ॥

इति ककुभः । प्रातःकालीयः । ३७ ।

शङ्कराभरणे प्रोक्तौ ग-नी तीव्रौ तु सादिमे ।
ग-न्यासे मध्यमांशे च ढालूकम्पसुशोभिते ॥ ४०६ ॥

धरिगमपधनिसरिगमपमगरिसधनिधपधनिसधनिमपमगरिगमपमगरि
सधनिधपधनिस ॥

इति शङ्कराभरणः । प्रातःकालीयः । ३८ ।

षड्हंसः सदा ज्ञेयः शङ्कराभरणस्वरैः ।
षड्जादिः पञ्चमांशः स्याद्न्यासोऽपि पञ्चमस्वरः ।
अवरोहे ग-हीनः स्यादारोहे तु ध वर्ज्जितः ॥ ४०७ ॥

सरिगमपनिसधनिधपमरिगमरिस । सधसनिधपपनिसरिगमपमसरिग
मपधपमपधपमपमरिपम । रिगमरिसरिसधनिधपमपमपमप । पपम
रिगमरिसधरिगमपासरिपारिपाधपमपधपमपमरिपमरिगमरिस । रि
सधनिधपमपमपमपम । पपमरिगमारिस । सरिगमपधपमपमरिगमा
रिस । पमपमपमरिगमरिसरिसरिसनीसरा ॥

इति षड्हंसः । तृतीयप्रहरोत्तरम् । ३९ ।

वेलावल्यां ग-नी तीव्रौ मूर्च्छना चाभिरुद्गता ।
आरोहे-म-नि-हीनायामंशः षड्जो बुधैः स्मृतः ।
अवरोहे-ग-वर्ज्जायां क्वचिन्नान्धारमूर्च्छना ॥ ४०८ ॥

गमपधसरिसनिधपध । मपरिगमारिसा । सरिगमपधपमगपरिगमा
रिस । सरिधपगरिगमारिमागपधसधनिधपधपमरिगमरिस । रिग
पमरिगमरिस । सरिगपधपसनिधपधधपमरिगमरिस । सधपमरिगम
रिस । रिगरिसनिधपधपमरिगमारिस ॥

इति वेलावली । प्रातःकालीया । ५० ।

ग-नी तीव्रौ तु केदार्य्यां रि-धौ नखोऽथ गादिमा ॥ ४०९ ॥

गमपनिसगमगसनिपनिस । गपगसनिपमगसगमपमगस । गसपनिप
मगसनिसनिसनिसनिमपनिपमगमपमगसनिसरा ॥

इति केदारी । तृतीयप्रहरोत्तरम् । ५१ ।

काम्बोधी तीव्रगान्धारा गान्धारादिकमूर्च्छना ।

Digitization by Arya Samaj Charitable Foundation, Chennai

आरोहे स-नि-हीनास्यान्म-धांशस्वरभूषिता ।
यदा गान्धारहीना स्यान्मूर्च्छना चोत्तरायता ॥ ४१० ॥

गपधसनिधसध । धसरिमगरिस । धसरिमगरिसरिगरिगरिसरि
स । सनिधपधापमगपधसारिसनिधपधपमगगपधसरिगरिसरिमगरिस
सरिसससनिधपधपमगरिगरिस । सनिधपधसध ॥

इति काम्बोधी । द्वितीयप्रहरोत्तरम् । ५३ ।

धैवतोद्ग्राहसंयुक्ता गोपीकाम्बोधिका पुनः ।
यत्रारोहे नि-वर्ज्यत्वं स-पांशाभ्यां सुशोभिता ॥ ४११ ॥

धमगरिगम । पधपमपमपमगरिगरिगरिस । सरिगमपासापामपा ।
मपधीःकम्पनन्निधपामपासरिसरिगरिगरिगमगरिगमपानिधपस
पमा । रिगारिसगरिसरिममरिगमपधनिधपसपमागरिगरिसा । धम
रिगमगरिगरिगरिस । पमगरिगरिसससरिसनिधपससा ॥

इति गोपीकाम्बोधी । द्वितीयप्रहरोत्तरम् । ५३ ।

आरोहे म-नि-वर्ज्यः स्याद्दीपको मालवोल्लितः ।
गान्धारोद्ग्राहसंयुक्तः संन्यासांशविभूषितः ॥ ४१२ ॥

.....

(१) इति दीपकः । द्वितीयप्रहरोत्तरम् । ५४ ।

• • • • • •

.....

(२) इति षटमञ्जरी । तृतीयप्रहरोत्तरम् । ५५ ।

(१ । २) अत्र दीपकरागस्य प्रस्तारस्तथा षटमञ्जर्या लक्षणं प्रस्तारश्च लिपिकरप्रमादेनादर्शपुस्तकादुद्भटः ।

या गौरीरागसम्भूता ललिता पञ्चमोज्झिता ।
सांशोद्ग्राहा तथा मान्ता गीतान्ते सा सुशोभना ॥४१३

सरिगमधनिसधनिधम गरिसरिसनिधनिसनिधनिसरिगमगरिसनिस
धनिसनिसनिधमधनिसरिगमगरिसनिधनिधमगरिसरिसनिसधमि
समागरिसनिधनिसस्था ॥

इति ललिता । षड्जदा । ५६ ।

गौरीमेलसमुद्भूता वङ्गला मध्यमोज्झिता ।
स-वियोगि-निना युक्ता गान्धारोद्ग्राहपांशका ॥ ४१४ ॥

गपधसधनिधपगपागरिगारिस । रिरिसधधसरिरिगपमरिसगपधनिधस
गपगारिसरिरिसधधसस्था ॥

इति वङ्गला । प्रथमप्रहरोत्तरम् । ५७ ।

गुर्ज्जरी मालवोत्पन्नावरोहे म-नि-वर्ज्जिता ।
ग-च्युतमध्यसोपेता धैवतच्युतस-स्वरा ।
गान्धारमूर्च्छनोपेता दाक्षिणात्या प्रकीर्त्तिता ॥ ४१५ ॥

गपधसरिगरिसधनिधपधपधपगमगरिस । रिरिसधधस । गपध । ग
पधसापगारिसरिरसधससधनिधपधसपगपधागमागरिसरिरिसधधसस ।

इति दाक्षिणा गुर्ज्जरी । प्रथमप्रहरोत्तरम् । ५८ ।

औत्तरा गुर्ज्जरी ज्ञेया शुद्ध-गा पूर्ववत् सदा ॥ ४१६ ॥

इत्यौत्तरा गुर्ज्जरी । प्रथमप्रहरोत्तरम् । ५९ ।

गौरीमेलसमुद्भूता धैवतोद्ग्राहशोभिता ।
धन्यासांशापि कौमारी प्रायशः कम्पितस्वरा ॥ ४१७ ॥

धनिसरिगमगरिसनिध । धनिसरिस । गमपधनिधपधनिधसमसस

Digitization by Arya Samaj Charitable Foundation, Chennai

गमगरिसनिधधनिसगनिसनीसरमा ॥

इति कौशारी । प्रथमप्रकरोत्तरम् । ६० ।

गौरीमेलसमुद्भूता षड्जोद्ग्राहेण मण्डिता ।
म-नि-त्यक्ता सदा रेवा ग-पादियमलस्वरा ॥ ४१८ ॥

सरिगपधसनिसरिसनधपगपगरिसनिसरिगपधसधसरिगपगरिसरिरि
सनधसनमा ॥

इति रेवा । तृतीयप्रकरोत्तरम् । ६१ ।

गौलस्तु ग-ध-वर्ज्जः स्याद्गौरीमेलसमुद्भवः ॥ ४१९ ॥

सरिमपनिसरिमरिसनिसनिपपपमरिरिमरिपस । पमपमपमपमरिरिमरि
सरिसनीसरमा ॥

इति गौलः । तृतीयप्रकरोत्तरम् । ६२ ।

अथ केदारगौलः स्यात् तीव्रगान्धारसंयुता ।
रजनीमूर्च्छनायुक्ता रि-प-योगेन मण्डितः ॥ ४२० ॥
तथैव म-प-योगेन पञ्चमांशेन शोभितः ।
आरोहे ग-ध-वर्ज्जः स्याद् रि-स्वरांशः क्वचिन्मतः ॥४२१॥

निसरिमपनिधधापमगरिरिपमगरिगरिम । निसरिमपसनिधपमपधा
पमगरिरिरिगरिसनिसरिपमगरिगरिसनिसरमा ॥

इति केदारगौलः । तृतीयप्रकरोत्तरम् । ६३ ।

अथ कर्णाटगौलः स्याद् रि-तीव्रतरसंयुतः ।
तीव्रगान्धारसंयुक्तो ग-म-न्यासांशशोभितः ॥ ४२२ ॥
षड्जादिमूर्च्छनोपेतः षाडवन्यासावरोहकः ।
आरोहे धैवतेनापि क्वचिद्वर्ज्जः सतां मतः ॥ ४२३ ॥

सरिगमपधनिसरीसनीसरमा । निधपमनिनिसरीसनिनीसरमा ॥

इति कर्णाटगौलः । तृतीयप्रकरोत्तरम् । ६४ ।

सारङ्गगौल आख्यातः सारङ्गस्वरसम्भवः ।
स-न्यासो मध्यमांशश्च ग-ध-हीनोऽथ सादिमः ॥ ४२४ ॥

सरिमपनीसारिसनीसनिपमपमरिमारिसरा । निसनिसनिसनिपमनिप
मपपनीसरिमपमरिमरिसनीसरमा ॥

इति सारङ्गगौलः । तृतीयप्रकरोत्तरम् । ६५ ।

रीतिगौलस्तु सम्पूर्णो धैवतादिकमूर्च्छनः ।
अवरोहे प-वर्ज्जः स्यान्न्यासांश-स-रि-भूषितः ॥ ४२५ ॥

धनिसरिगमपधनीनोधपमपगमरिसनिस । धनिसरिगमपपधनिधपम
गमरिसनिसरमा ॥

इति रीतिगौलः । तृतीयप्रकरोत्तरम् । ६६ ।

अथ नारायणे गौले तीव्रगान्धारसंयुते ।
अवरोहे ध-गौ नस्तो निर्योरन्यतरादिमे ॥ ४२६ ॥
पुनःस्वस्थानगमके चारोहे रि-पयोर्मतः ।
पूर्वोक्तराहतोपेते मध्यमन्यासमण्डिते ॥ ४२७ ॥

निसरिगमरिसरिमपधधमपमरिगमरिस । निसनिपमपपरिगमरिस । रि
मपमपमरिरिगमरिस । निसनिसरिमरिमपधपमपमरिमरिगमरिसनि
धनिस ॥

इति नारायणगौलः । तृतीयप्रकरोत्तरम् । ६७ ।

अथ मालवगौलेऽस्मिन् गौरीस्वरसमुद्भवे ।
त्यक्त-धे रि-स्वरोद्ग्राहे न ह्यारोहे तु ग-स्वरः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

आरोहे यदि गान्धारः षाड्जिर्मान्तो विधीयते ॥ ४२८ ॥

रिमपनिसगनिपपमगगरिमगरिस । रिमपनिपनिसरिमरिमारिगगगारिस । सनिपमपमगमरिमगरिसा ॥

इति षाडवगौडः । तृतीयप्रकरोत्तरम् । ६८ ।

ग-नौ त्यज्यावधीरोहे रि-धौ यत्र च कोमलौ ।
षड्जादिस्वरसम्भूतिर्देश्यामंशस्तु रि-स्मृतः ॥ ४२९ ॥

सरिमपधसनिधमपगगरिस । रिरिसनीधसा । सरिमपनिधमप मपगगरिसरिमपपमगरिरिगरिस । धधस ॥

इति देशी । सर्व्वदा । ६९ ।

हिन्दोलेऽथ रि-पौ त्यक्त्वौ कोमलो धैवतो भवेत् ॥ ४३० ॥

सगसधनिस । सनिधमगमगसगसधमधनिस । सगसनिसनिधमगमग सनिसरसा ॥

इति हिन्दोलः । द्वितीयप्रकरोत्तरम् । ७० ।

हिन्दोलो रि-पयोगेन मार्गहिन्दोलको भवेत् ॥ ४३१ ॥

इति मार्गहिन्दोलः । द्वितीयप्रकरोत्तरम् । ७१ ।

रि-धौ तु कोमलौ ज्ञेयावाभीरीमूर्च्छनाश्रुते ।
आरोहे च ध-वर्ज्जित्वं रागे ढक्काभिधानके ॥ ४३२ ॥

सरिगमपनिसगनिधपनिधपधपमपधपमगारिस । सरिगमपनिधपगारिसरिस । (ने क्रमनं सर्व्वत्र।) पगारिमनिधपपधसरिगमपागारिसरिस ॥

इति ढक्का: । तृतीयप्रकरोत्तरम् । ७२ ।

रिस्तु तीव्रतरो यस्मिन् गान्धारस्तीव्रसंज्ञकः ।
धस्तु तीव्रतरः प्रोक्तो निषादस्तीव्रनामकः ।

अवरोहे ध-गौ नस्तो नाटे रि-स्वरमूर्च्छना ॥ ४३३ ॥

रिगमपधनिसगनिपमपमपमरीसारिगमरिगमपधनिसधनि । सधनिप धनिपमपमपमपमपमरिस । रिसनीसग्मा ॥

इति नाटः । तृतीयप्रकरोत्तरम् । ७३ ।

वेलावेलीसमुद्भूतो मांशो रि-न्यासको नटः ।
अवरोहे ग-हीनः स्यान्नान्यारादिकमूर्च्छना ॥४३४॥

गमपधनिसगनिधपमपमपमम । रिगमारिसधनिसधनि । सगनिपस । (निषाद-तारषड्जयो टालुः ।) सनिसनिसनिसपधनिमपनिप । (सर्व्वत्र विकर्षणम् ।) धनीधपमपमपमपमरिगमारिस ॥

इति नटनारायणः । तृतीयप्रकरोत्तरम् । ७४ ।

शङ्कराभरणोत्पन्ने गान्धार-स्वरवर्ज्जिते ।
अथ साधङ्गनाटेऽस्मिन् स-न्यासांशसमन्विते ।
षड्जोद्ग्राहेण सम्पन्ने म-धावारोहितौ स्मृतौ ॥ ४३५ ॥

सधरिमपपधपधपमपमपमरिसधापधमपधसधरिरिस । रिमपपधनीधप मपमपमरिसधापधमपधसधरिसा ॥

इति धानाटः । तृतीयप्रकरोत्तरम् । ७५ ।

छायानाटस्तु विज्ञेयः शङ्कराभरणस्वरैः ।
आरोहणे नि-वर्ज्जः स्यादवरोहे ग-वर्ज्जितः ।
धैवतोद्ग्राहसंयुक्तो रि-न्यासोऽनेकमध्यमः ॥ ४३६ ॥

धधपरिगमपधसनिधपमपमरिधपमपमपमपमरिधापमपमरिधरिसरि धस ॥

इति छायानाटः । तृतीयप्रकरोत्तरम् । ७६ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ कामोदनाटेऽस्मिन् तीव्रगान्धारसंयुते ।
धैवतोद्ग्राहसम्बन्धे वरोहे ग-ध-वर्ज्जिते ।
स-न्यासो मध्यमांशः स्यात् सर्व्वत्र मधुरत्वनम् ॥ ४३७ ॥

इति कामोदनाटः । प्रथमप्रकरोत्तरम् । ७७ ।

आभीरीनाटसम्भूतोऽवरोहे ध-स्वरोज्झितः ।
अथ न्यासविशेषाद्यः आभीरीनाटकः स्मृतः ।
स-स्वरादिग्रहन्यासो वक्रितौ गौ ग-नी स्वरौ ॥ ४३८ ॥

इति आभीरीनाटः । प्रथमप्रकरोत्तरम् । ७८ ।

अथ वायुमेघसम्भूतोऽवरोहे ग-ध-वर्ज्जितः ।
षड्जादिन्यासभेदेन स्यात् कल्याणनाटकः ॥ ४३९ ॥

इति कल्याणनाटः । प्रथमप्रकरोत्तरम् । ७९ ।

अथ केदारनाटेऽस्मिन्नवरोहे रि-ध-वर्ज्जिते ।
वादिसं च ग-नौ तीव्रावरोहे ध-नौ त्यजेत् ॥ ४४० ॥

इति केदारनाटः । द्वितीयप्रकरोत्तरम् । ८० ।

वराटीस्वरसञ्जाते वराटीनाटके पुनः ।
अवरोहे ध-गौ वर्ज्यौ न्यासांशौ षड्जपञ्चमौ ।
धैवतोद्ग्राहसम्बन्धे नि-नयोः कम्पनं भवेत् ॥ ४४१ ॥

इति वैराटीनाटः । द्वितीयप्रकरोत्तरम् । ८१ ।

इति नटनाटाः ॥

गौरीमेघसमुत्पन्नारोहणे ग-नि-वर्ज्जिता ।
मध्यमोद्ग्राहसंन्यासा सावेरी न्यासषड्जमा ॥ ४४२ ॥

इति सावेरी । द्वितीयप्रकरोत्तरम् । ८२ ।

सावेरी तीव्रगान्धारा धैवतोद्ग्राहसञ्ज्ञका ।
मध्यमांशा नि-हीना चारोहणे ग-नि-वर्ज्जिता ॥ ४४३ ॥

इति सावेरी । तृतीयं । ८३ ।

गान्धारोद्ग्राहसञ्जाते रि-नौ कोमलनीचगौ ।
ध-न्यासौ मध्यमांशश्च सर्व्वत्र मधुरत्वनम् ॥ ४४४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

गमपधनिधपनीधपमपमगरीसनीधपनिसरीसनीधगमपागरिसानिधध
नीसा । सागरीसनीधधनीसरमा ॥

इति सालङ्गः । सर्व्वदा । ८३ ।

रि-त्रयोदूग्राहसंयुक्तः षड्जोदूग्राहोऽथवा मतः ।
श्रीरागस्त्रीवगान्धार आरोहे ग-ध-वर्ज्जितः ॥ ४४५ ॥

रिरिरिपमगरिगरिसासानिसनिधपमपनिनिस । निसरिसमपपनिनि
सरिगरिसनिसनिसनिधपमपमपमामगरिरिगरिरिगरिसनिनिसरमा ॥

इति श्रीरागः । तृतीयप्रहरोत्तरम् । ८५ ।

गौर्य्यत्मन्ना पहाड़ीस्यान्नान्धारस्वरवर्ज्जिता ।
उदूग्राहे षड्जसम्पन्ना न्यासांशयो रि-शोभिता ॥ ४४६ ॥

सरिमपधपपमपमरिरिमरिसरिरिसनीध । रिमपधपपमपपमरिसरिरि
सनीधरमा ॥

इति पहाड़ी । तृतीयप्रहरोत्तरम् । ८६ ।

विहागडे ग-नी-तीव्रावारोहे तु रि-वर्ज्जिते ।
गान्धारोदूग्राहसम्पन्ने न्यासांशो रि-स्वरो मतः ॥ ४४७ ॥
यद्यस्मिन् पञ्चमोदूग्राहः स्यादारोहे ग-वर्ज्जनम् ।
मूर्च्छना मध्यमे चापि प-राहित्यं सदा भवेत् ॥ ४४८ ॥

गमपनिसगरिसनिपमगमपमगरिसनीध । पनिसमगारिसनीध । गम
पनीसानीपमगारिसनिसरिसनिसा । पनिसारिसमगारिसानिपनिसरि
सनीधरमा ॥

इति विहङ्गड़ः । तृतीयप्रहरोत्तरम् । ८७ ।

गौरीमेलसमुत्पन्ना षड्जोदूग्राहसमन्विता ।

न्यासांश-ग-स्वरोपेता पूर्व्वी सा सुखदायिनी ॥ ४४९ ॥

सरिगमपधनिसनिधपधपमपपमगरिगागमपपमगरिस । (तान-
समाप्तौ ने विकर्षणम् ।) सरिसरिसधपस । धनिधपधपधमगरिगा
(विकर्षणम् ।) रिसरिगमपधपगरिगा । रिसगमपमगरिगा (विक-
र्षणम्) । रिसधपसा ॥

इति पूर्व्वी । तृतीयप्रहरोत्तरम् । ८८ ।

कोमलौ च रि-धौ यत्र ग-नी यत्र च तीव्रकौ ।
मश्च तीव्रतरः प्रोक्तः पूर्व्वीसारङ्गके पुनः ।
षड्जोदूग्राहसम्पन्ने ग-पौ न्यासांशकौ मतौ ॥ ४५० ॥

रिगमपधनिसनिधपमपपमगमगरिगगासनीसरमा । (तान-समाप्तौ
ने विकर्षणम् ।) पध्मधपमपपधमगरिगसरिसनीसरमा ॥

इति पूर्व्वी सारङ्गः । तृतीयप्रहरोत्तरम् । ८९ ।

रिस्तु तीव्रतरः प्रोक्तस्त्रीवगान्धारयोभिते ।
सामन्तसंज्ञके रागे न्यासोदूग्राहांशषड्जके ॥ ४५१ ॥

सरिगमपधनिसनिधपमपमगरिगरिस। सरिगमपमपपमरिगमगरिस।
सरिगरुपधनिसरिगमपमगमगरिसस । निधपमपमगरीसरीसनीसरमा ॥

इति सामन्तः । तृतीयप्रहरोत्तरम् । ९० ।

धैवतोदूग्राहधांशान्तो गौरीमेलसमुद्भवः ।
रागो मङ्गलकोयाख्यो ध-नी यत्र ससन्वितौ ॥ ४५२ ॥

धनिसरिगमपध पमपपमगरिसरिगमगरिसरिसनिधसनिधसनिधनिस
रिसनिधधनीसरमा। गमपमगरिसरिसनिधासाधनीस ॥

इति मङ्गलकोयकः । सर्व्वदा । ९१ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

नादरामक्रिया गौरीमेलोत्पन्ना म-भूषिता ।
षड्जोद्ग्राहा च नि-न्यासारोहे गान्धारवर्ज्जिता ॥ ४५३ ॥

सरिगमपधनिसनिधपमपगमगमगरिसरिसनि सरिमगमगरिसरिस
निसरिगमगमगरिसरिसनिसरिगमगमपधनिधपधपमपगमगरिसरिस
नी । सरिगमगरिसरिस ॥

इति नादरामक्रिया । प्रथमप्रकरोत्तरम् । ६२ ।

कुडाद्द तीव्र-गोपेता चारोहे म-नि-वर्ज्जिता ।
गान्धारोद्ग्राहसंयुक्ता पञ्चमांशेन शोभिता ॥ ४५४ ॥
ध-र्ष्योरन्यतरेणैव यत्रावरोहणं मतम् ।
गान्धारेण विहीना साप्यवरोहे क्वचिन्मता ॥ ४५५ ॥

गपधसरिसनिपमगरिगमारिसरिगपमगधपमगरिगमारिसगपगमधनि
पसधपमगरिगमारिसा ॥

इति कुडाद्द । प्रथमप्रकरोत्तरम् । ६३ ।

तीव्रगान्धारसंयुक्त चारोहे वर्ज्जितौ ग-नी ।
षड्जोद्ग्राहेण सम्पन्ने गौण्ड आन्ध्रेडितस्वरैः ॥ ४५६ ॥

सारिमपधपधसनिधपमपमागरिसरिस । सारिमपमागरिसरिरिसध
मधसनिधपमपमागरिमरिस । सारिमपमागरिसरिरिसधसधसरि ।
धपमगरिसरिरिसधस ॥

इति गौण्डः । चतुर्थी । ६४ ।

अवरोहे ध-गौ नखौ मन्द्र तीव्रतरौ भवेत् ।
देवगिरौ ग-नी तीव्रौ यत्र स्यात् षड्जमूर्च्छना ॥ ४५७ ॥

सरिगमपधनिसनिपमरिस । धनिसधनिसरिगमपधपमपमरिमरिस
सरिगमपधनिसरिगमपपमरिस । धनिसधनिसरिसनीसा ॥

इति देवगिरिः । द्वितीयप्रकरोत्तरम् । ६५ ।

तदा तु देवगान्धारी पूर्णश्चेद्वैरवो यदा ।
गान्धारादिस्वरोद्ग्राहा स-स्वरांशेन शोभिता ।
सा यदा रि-स्वरोद्ग्राहा तदारोहे ग-वर्ज्जिता ॥ ४५८ ॥

गमपधनिधधपमागरीनिधनीसासरगानिनिधनीसानिधधपमगरीसानिध
नीसा ॥

इति देवगान्धारी । द्वितीयप्रकरोत्तरम् । ६६ ।

गौरीमेलसमुत्पन्ना त्रिवणी म-स्वरोज्झिता ।
अवरोहणवेलायां षड्जोद्ग्राहांश-रि-स्वरा ॥ ४५९ ॥

सरिगमपधनिसनिधपगरिगरिसनीसा । सरिगमपापगरिगपगरिगरि,
सरिस । गमपगरिसावरिगमगरिसरिसनीसरसा ॥

इति त्रिवणी । तृतीयप्रकरोत्तरम् । ६७ ।

रिक्तु तीव्रतरः प्रोक्तो मन्द्रस्तु तीव्रतरो भवेत् ।
अतितीव्रतमो गः स्यान्निस्तीव्रः स्यात् कुरङ्गके ।
षड्जोद्ग्राहेण सम्पन्ने न्यासांशौ षड्जपञ्चमौ ॥ ४६० ॥

सरिगमपधनिसनिधपमपामपमगरिगरीस । सरिगमपधपमपमग
मगरीसरिगमपापमगमपमगरिसनीसरसा ।

इति कुरङ्गः । तृतीयप्रकरोत्तरम् । ६८ ।

रि-धौ च कोमलाख्यातावतितीव्रतमश्च गः ।
मश्च तीव्रतरो यत्र निषादस्तीव्रसंज्ञकः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सौदामिन्यान्तु गान्धार-स्वरोद्ग्राहः सतां मतः ॥ ४६१ ॥

गमपधनिसरिसनिसनिधपमपापमगमगरिसा । सरिगमपधमपमगरिसस
रिगमगरिसासरिसनिसस्सा । गमपध्मपागमपमागरिसानीसस्सा ॥

इति सौदामिनी । तृतीयग्रहरोत्तरम् । ९९ ।

षट्श्रुतिर्मध्यमो यत्र धैवतः कोमलो भवेत् ।
निषादस्तीव्र आख्यातो वैजयन्ती रि-पूर्विका ।
आरोहणेऽवरोहे च कादाचित्कौ ग-धौ मतौ ॥ ४६२ ॥

रिमपनिसधनिपमपमरिगरिस । रिमपनिधपमपमरिगरिस । निसरि
मपमगरिसनिसरिसनिधपमपनिसस्सा ॥

इति वैजयन्ती । द्वितीयग्रहरोत्तरम् । १०० ।

ग-नि-भ्यां वर्ज्जितो हंसो रि-ध-कोमलसंयुतः ॥ ४६३ ॥

सरिमपधधपमरिरिमपपमरिरिमरिसरिसधसस्स । सरिमपमपधसस
धमपमसरिसरिसधसस्स ॥

इति हंसः । द्वितीयग्रहरोत्तरम् । १०१ ।

कल्याणमेलसम्भूतो रागः कोकिलसंज्ञकः ।
सर्व्वदा म-नि-हीनः स्याद्गान्धारादिकमूर्च्छनः ॥ ४६४ ॥

गपधसस्सधपमपगरिसरिसासरिगपधसागरिसरिधसधपमपगरिसा ।
सरिसरिगपागरिसरिगरिधसस्सधसस्सरिगपगरिसरिसधसस्स ॥

इति कोकिलः । तृतीयग्रहरोत्तरम् । १०२ ।

कोमलाख्यौ रि-धौ यत्र ग-नी च तीव्रसंज्ञितौ ।
मध्यमग्रामतः संज्ञः स्याज्जयश्रीनामके पुनः ।
आरोहणे रि-धौ नस्तो नि-स्वरोद्ग्राहमण्डिते ॥ ४६५ ॥

निसगरिगमपनिधपमगमगरिसनिसगरिसनीसगरि । गमपमपधमगरि
सनीसापनीसागमपनीसारिसनिसनिधपमगामपमगरिस । नीनीसगारि
रिसनीसस्सा ॥

इति जयश्रीः । पञ्चमग्रहरोत्तरम् । १०३ ।

गौरीमेलसमुद्भूतो धैवतस्वरवर्ज्जितः ।
आरोहणे रि-हीनः स्यान्निषादादिः सुरालयः ॥ ४६६ ॥

नीसगमपनीसनिपमगरिसनिस । नीसगमगमगरिसनिस । नीसगमपध
मगरिसरिसनिसपनीसगमपमगरिसरिसनिसनिपमपनीसगमपमगरिसरि
रिसनिस ॥

इति सुरालयः । तृतीयग्रहरोत्तरम् । १०४ ।

गौरीमेलसमुद्भूत आरोहे म-नि-वर्ज्जितः ।
ग-ध-हीनावरोहः स्यान्नादिरर्ज्जुनसंज्ञकः ॥ ४६७ ॥

गपधसस्सनिपमरिमगपपधसमधसरिगधमरिस । रिरिरिरिगमरिसम
रिसरिसरिसनिपपधनिपमपमरिगमरिसरिसधसस्सरिरिसधसस्सरि
सस्सरिगमरिसरिसधसस्स ॥

इत्यर्ज्जुनः । द्वितीयग्रहरोत्तरम् । १०५ ।

कल्याणमेलसम्भूतो ध-हीनः पञ्चमं गतः ।
ऐरावतो ग-पूर्व्वोक्तो न्यासषड्जविभूषितः ॥ ४६८ ॥

गमपनिसरिसनिपमगमपगमगरिगपनिसरिसनीस । गमपमगरिस
नीस । गमपनिपमगमपमपमागरि । सरिसनिसपनिसरिसमगरिस
निसपनीसस्स ॥

इत्यैरावतः । द्वितीयग्रहरोत्तरम् । १०६ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

शङ्कराभरणे मेले रागः करुणसंज्ञकः ।
प-हीनो गादिराख्यातो वङ्गमध्यमसङ्गतः ॥ ४६९ ॥

गमनिसरिसनिसनिधनिधमगपमगमगमगरिसरिसरिसनिसधनिस । म
धनिरिसनिसरिस । मगमगमगमगरिगमगमधनिसनिधनिधमगगमगमगमगरिस
रिसनिसरिसा ।

इति करुणः । द्वितीयप्रकरोत्तरम् । १०७ ।

रत्नावल्यां रि-नी नस्राक्षीव्रतीव्रतरौ ग-मौ ।
गान्धारमूर्च्छना यत्र तत्रोक्तो न्यासपञ्चमः ॥ ४७० ॥

गमपधसगमगधसधपमगपगमपमगमपमपधसधपमपम । मगसधस । गमपम्र
पमपाप । धसधपधपमगमप । मगमगसधसा ॥

इति रत्नावली । द्वितीयप्रकरोत्तरम् । १०८ ।

ध-हीने कल्पतर्वाख्ये तीव्रतीव्रतरौ ग-रौ ।
ऋषभोद्ग्राहसंयुक्ते षड्जन्यासशमन्विते ॥ ४७१ ॥

रिगमपनिसरिसनिपमपमगरिस । रिगमरिगमपमगरिसनिसपनिसरिस
निसारि । गमपनिपमगरिगमगरिसनिसरा । पनिसपनिसरिगमगरि
सनिसरा ॥

इति कल्पतरुः । तृतीयप्रकरोत्तरम् । १०९ ।

श्रीरागमेलसम्भूता सोरठी रि-खरोद्ग्रहा ।
पञ्चमाक्षुम्भितोपेता रि-पर्य्यन्तं पुनस्तथा ॥ ४७२ ॥
स-क्षुब्धिता म-पर्य्यन्तमग्रस्वस्थानषड्जका ।
तथैव पञ्चमोपेता रि-स्वरच्यवितोदिता ॥ ४७३ ॥

रिमपमनिधपमपधापमगरीडसा । निसारिमपरीसनिधपमपगीड

निधपमगमधापमगरीडसा । निसारिमपरीसनिधपमपगीडनिधपमम
धापमगगरिमपमगरीसनिध ॥

इति सोरठी । प्रथमप्रकरोत्तरम् । ११० ।

शुद्धस्वरसमुद्भूतो गान्धारोद्ग्राहसंयुतः ।
आरोहे त्यक्त-धो ज्ञेयो गान्धारच्यवितोदितः ॥ ४७४ ॥
अग्रस्वस्थानसंयुक्तः पुनःस्वस्थानसंयुतः ।
चान्दोलितनिषादाद्यो मारुधान्दोलितोमुक्तः ॥ ४७५ ॥

गमपगीड । निधसापमगरिस । गमपमगमपनिसनिधपमपमगम
गरिसरिगमपसगरिस । गमपनीसगारिसनिसनिधगमपागम
गारिस ॥

इति भाटः । तृतीयप्रकरोत्तरम् । १११ ।

नाटमेलसमुद्भूतो रागः कुमुदसंज्ञकः ।
आरोहणे म-वर्ज्योक्तो गान्धारोद्ग्राहशोभितः ॥ ४७६ ॥

गमपनिसरिसनिधपमगरिसरिगमपमगरि सनीसगपधनिसनिधपधनिसनिध
पमगरिस । गपपगपमगरिगपमगरिसनीसरिसनीसरिसनिसरिगपम
गरिसनीसा ॥

इति कुमुदः । तृतीयप्रकरोत्तरम् । ११२ ।

नाटमेलसमुद्भूतो रागश्चक्रधरः स्मृतः ।
पञ्चमेन विहीनः स्यात् षड्जोद्ग्राहेण शोभितः ॥ ४७७ ॥

सरिगमधनिसरिसनिधमगमगरिसरिगमगरिसरिगमधमगरिसरिगमग
रिसरिनिधनिसनिधनिसधनिसरिगमगरिस ॥

इति चक्रधरः । तृतीयप्रकरोत्तरम् । ११३ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

भैरवीमेलसम्भूतो गान्धारेण विवर्ज्जितः।
आरोहे तु नि-वर्ज्जः स्यान्मादिः सिंहरवः स्मृतः॥ ४७८॥

मपधसरिमरिसधसनिधपऽपमपमरिमधसरिमा। रिमपमरिसधसधसरिम
पधसरिसनिधपऽपमपमरिमधसरिमा। रिमपमरिसधसधसरिमपधसरिस
निधपमपमपमरिमपमरिमधसरिमा॥

इति सिंहरवः। तृतीयप्रकरोत्तरम्। ११४।

श्रीरागमेलसम्भूता ग-स्वरेण विवर्ज्जिता।
मञ्जुघोषा ध-पूर्व्वा स्यादारोहे त्यक्तनि-स्वरा॥ ४७९॥

धसरिमपधसनिधपधमरिस। धमरिमपधपमधपमपमरिमपमरिमरि
सधसनिधपधपमपमरिमपमरिसधसरिमा॥

इति मञ्जुघोषाः। तृतीयप्रकरोत्तरम्। ११५।

सुखारीमेलसम्भूता म-हीना शिवबल्लभा।
न्यभावोदूग्राहगान्धारा पांशन्यासप्रयोभिता।
अवरोहणवेलायां निषादेन सुशोभिता॥ ४८०॥

गपधसरिसनिधपनिधपपधधपगमगरिसरिरिसरि। पपगपपगरिरिगरि
सरिरिसधसरिमा। मापधानिधपनिधपपधधपगमगरिसरिरिसधस॥

इति शिवबल्लभा। द्वितीयप्रकरोत्तरम्। ११६।

मुद्रमेलसमुद्भूतः षड्जादिः स मनोहरः।
आरोहे ग-रि-मैस्त्यक्त आन्दोलित-प-सान्वितः॥ ४८१॥
धैवतं प्राप्य तस्माच्च सन्निवृत्तोऽत्र कम्पितः।
पञ्चमात् षड्जमासाद्य निवृत्तो मध्यमं प्रति।
तत्राप्यान्दोलितो गे च री च सस्थानशोभितः॥ ४८२॥

सपधपापधनिधपसापधनिसानिधपधापधनिधपमागारीसा। सपासपाप
धपपपापमपानिधपधासापासापामागारीसा॥

इति मनोहरः। द्वितीयप्रकरोत्तरम्। ११७।

भैरवीस्वरसम्भूता निषादोदूग्राहसंयुता।
गान्धारे नैत्यवृक्ता या ज्ञेया सानन्दभैरवी॥ ४८३॥

निनिसगगागरिसरिरिसनिनिसा। निनिमगगमपपमगगमगगागरिस
निनीसरसा। धापमपमपमगगमगगागगगागरिसनिनिसगगरिसनिनिस
सा॥

इत्यानन्दभैरवी। सर्व्वदा। ११८।

शङ्कराभरणो रागः शङ्करानन्दको भवेत्।
रि-ग-पास्यत्र चांशाः स्यू रि-न्यासेन सुशोभितः।
स्वरसञ्चादिनां योगाद्यत्र स्याद्दृङ्कम्पनम्॥ ४८४॥

सरिगमपपमपपपमपपपसमगरिगगागागरिगगागारिसरिगरिस। रीस
रीसरीगरिसरीसरसनिधनिसरीसनिसासरिगमपासपारिसापमगीपस। स
निधपमपमगगागारिसरिस॥

इति शङ्करानन्दः। सर्व्वदा। ११९।

आरोहणे नि-योगेन सैन्धवी मानवी मता॥ ४८५॥

धनिसरिमपमगारिमानीधाधानीसारिमपानिधपमागरिसरिसा। सपि
सारिमागरिपमगरिसरीसधधनिसा॥

इति मानवी। सर्व्वदा। १२०।

कल्याणमेलसम्भूता राजधानी सुखप्रदा।
आरोहणे ध-हीनास्याद्दृङ्कम्पमनोहरा।

Digitization by Arya Samaj Charitable Foundation, Chennai

[illegible] ॥ ४८६ ॥

[illegible]

इति रागलक्षणं । उर्वशी । १२ ।

[illegible]

[illegible] शोभिता ॥ ४८७ ॥

[illegible]

इति उर्वशी । उर्वशी । १३ ।

[illegible]

[illegible] ष ॥ ४८८ ॥

[illegible] ॥ ४८९ ॥

[illegible] ॥ ४९० ॥

[illegible] ॥ ४९१ ॥

[illegible] ॥ ४९२ ॥

रिश्च पूर्वं तथा तीव्रं तीव्रतरञ्च ग-स्वरम् ।
तीव्रतमं तथा मध्यं मध्यं तीव्रं स्वरं तथा ॥ ४९३ ॥
मध्यं तीव्रतमं मध्यं पूर्वाख्यं तीव्रसंज्ञितम् ।
तीव्रतरं विलाद्यञ्च तीव्रतमञ्च नि-स्वरम् ॥ ४९४ ॥
इत्येतांश्च दश त्यक्त्वा रागलक्षणमीरितम् ।
हादशभिर्विकाराद्यैः शुद्धैश्च दशभिः स्वरैः ॥ ४९५ ॥
एतैः कृत्वा प्रविद्वांसो ये त एवात्र प्रकीर्तिताः ।
अन्यहेतोश्च ते तैः कृत्वा रागा अपि प्रतिष्ठिताः ॥ ४९६ ॥

इति रागलक्षणम् ।

॥ समाप्तिः ॥

Printed by G. C. Dey, at the [illegible]
14, Goa Bagan Street, Calcutta.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai